[redacted]

सत्यहरिश्चन्द्रम्

(महाकाव्यम्)

श्री वाल्मीकि क्याम्पस पुस्तकालयलाई समर्पित ।

- पूर्णप्रसाद ब्राह्मण

वाल्मीकि विद्यापीठ ... पुस्तकालय

सत्यहरिश्चन्द्रम्

(महाकाव्यम्)

पूर्णप्रसादः 'ब्राह्मण':

प्रकाशकः
सर्वकारस्य संस्कृतिविभागः

प्रथमसंस्करणम् २००७ वैक्रमाब्दे
द्वितीयसंस्करणम् २०२७ वैक्रमाब्दे

सर्वाधिकारो लेखकस्य

मूल्यम् १५।-

मुद्रणालय : – सर्वकारमुद्रणालयः

एतत्प्रकाशयितुं समकल्प्यत नैपालराष्ट्रशुभ-
भविष्यदाशाऽऽलम्बनयोर्युवराज्ञीयुवराजा-
धिराजयोरैश्वर्यराज्यलक्ष्मीवीरेन्द्रयो
राष्ट्रियाऽनन्दमूर्तरूपशुभविवा-
होत्सवसमारोहे

एतत् समर्प्यते

सत्यं परिचिचीषुभ्यः !

विश्वबन्धुत्वे जिगमिषुभ्यः !

आत्मनि विश्वात्मभावमानिनीषुभ्यः !

प्रकाण्डवैदुष्यविष्वक्प्रथितयशसां साक्षाद्विद्यावतारभूतानाम् पण्डितराजपद-विभूषितानाम् देशान्तर-विद्वद्गणैरप्यभिनन्दित'प्रतिसंस्कृता सिद्धान्त कौमुदी'-प्रभृत्युच्चवाङ्मयरचयितॄणामस्मत्पूज्यचरणानाम् श्रीगुरूणां सोमनाथशर्मणाम्--

सम्मतिः

श्रीः

२०२७ मार्गकृष्णरवौ नवम्याम्

विद्वद्वरपूर्वमीमांसादर्शनाचार्यश्रीपूर्णप्रसादब्राह्मणस्य कृतिः सत्यहरिश्चन्द्रम् नाम संस्कृतभाषानिबद्धं १३ सर्गात्मकं महाकाव्यं, यन्नेपालदेशीयकविनिर्मिते काव्यजगतीदमेव प्रथमं संस्कृतमहाकाव्यमिति मयाऽनुभूयते, साद्यन्तं सस्पृहमवलोकितं मया। करुणरसाप्लुतस्य तस्य हरिश्चन्द्रकथानकस्याऽनुरूपया हृदयद्राविण्या वाग्धारया सह नीयमानं मनो मयेव सहृदयैः पाठकैरपि बलेन प्रत्यावर्तनीयं भवेदिति मन्ये स्थाने प्रयत्नोऽभिनन्दनीयः। किञ्च-परं मुद्रणे पद्यबन्धेऽपि मध्येकृतः पदच्छेदः प्रवहन्तीं वाग्धारां विच्छिनत्ति किमु !

—सोमनाथः सिग्द्यालः

आजीवनं साहित्यपाथोधिविहारलब्धनिर्वृतीनां सततब्रह्मकर्मस्वाध्यायनिष्ठापवित्रान्तःकरणानां नेपालबाल्मीकिसंस्कृतमहाविद्यालयप्रधानाचार्याणामाचार्योपनामवतां श्रीमदस्मद्गुरूणां रामनाथमहोदयानाम् —

सम्मतिः

पूर्णप्रसादरचितं रसरीतिभावा –
ऽलङ्कारलालितपदावलिबन्धरम्यम्
काव्यं महत् कविसमाजनुतं विलोक्य
मोदाब्धिवीचिषु मनांसि सतां प्लवन्ते

नूत्नं रत्नं हि प्रत्नावनिपतितिलकश्रीहरिश्चन्द्रचञ्चत् –
सत्याऽनुस्यूतचर्याञ्चितसरसमहाकाव्यमीड्यं कवीनाम्
अद्यासाद्य प्रसारं बुधवरहृदयोन्मीलितं ग्राह्यमेतत्
सत्ये मार्गे नियुङ्क्ताम् सकलजनमनः सद्विचारप्रदानैः
नूत्नं रत्नमयत्ननिर्मितमिदं हृद्यैरवद्येतरैः
पद्यैः ख्यातकवीन्द्रकैरवकुलोल्लासाय चन्द्रायितम्
सत्यत्वेऽतुलशेमुषीं कलयतः काव्यं विशालं हरि-
श्चन्द्रस्याऽवनिपालकस्य सततं क्षोणौ समुज्जृम्भताम्

प्रज्ञापूर्णाय पूर्णायुः पूर्णाख्याय द्विजन्मने
वितरन्तु सदा देवा इति रामेण प्रार्थ्यते

—रामनाथ आचार्यः

किञ्चित् वक्तव्यम्

२००७ तमे वैक्रमाब्दे जाते प्रथमसंस्करणे, सांप्रतं जायमाने द्वितीयसंस्करणे च मुख्यतया ममैतदेव वक्तव्यमासीदस्ति च– अतिप्राचीना हरिश्चन्द्रकथा, कोऽप्यतिपुरातनः समयः, तात्कालिकः सामाजिको व्यवहारादर्शश्चाऽस्य काव्यबन्धस्य पृष्ठभूमिः । तदयं न प्रभवेदैदंयुगीनं समीक्षणं बिभ्रतां सहृदयानामाकर्षणाय । स्यान्नाम वैतत् कथानकमपि काल्पनिकमेव ! तथाऽपि तदुपपाद्यस्य विश्वगीतमहिम्नो भगवतः सत्यस्य प्रत्यक्षरमवतरणात् प्रयोजनवाददृष्ट्याऽपि न शक्यतेऽस्य (कथानकस्य) महान्तं महिमानमपलपितुम् । औचित्यसंपादनायाऽवश्यकस्थले तात्कालिकीं स्थितिमविरुध्य स्वकल्पनया कथांशं क्वचित् संयोज्य क्वचिन्न्यूनीकृत्य च कथानकस्य वैरूप्यं दूरीकृतं वर्वर्ति ।

बन्धस्य रोचकताविषये महात्मनस्तस्य हरिश्चन्द्रस्य राज्ञः केवलं महत्तां, विशालताम्, उच्चतामेव लक्षं लक्षं धावन्नहं पार्श्वतः पुरतो वा कति काव्यसौन्दर्यवस्तूनि दर्शं दर्शमप्युपेक्षै, तदहमेव नो संख्यातुमलम् । सरलतायै प्रायः पदानामसमासात् स्वाभाविक्यस्ति बन्धे शिथिलता । आदर्श, कल्कल्, साँसाँ, सर्र्रम् इत्यादयः शब्दाः केचिदनुकरणाय, कतिपये प्रचलनसंरक्षणाय व्युत्पत्तिक्लेशमाश्रित्याऽपि प्रयुक्ताः सन्ति । अलङ्कारवाङ्मयादौ लिखितानाम् लक्षणानां नियमानां च परिधौ नियन्त्रणं श्रद्धानिर्गलं सभावोद्रेकम् च सत्यगाथां गायतां श्रद्धावतां कृतेऽन्तराय एवेति तं तं त्रुटिविशेषं दर्शं दर्शमपि गजनिमीलिकाः समाश्रयम् ।

तेन ये नाम संस्कृतविद्वांस आङ्ग्लविद्वांसो वा प्रातिस्विकविषयेषु धर्मशास्त्रसाहित्यदर्शनविज्ञानसमाजशास्त्रादिषु पण्डितंमन्या गर्वदृशा प्रतियोगिताभावेन समालोचयितुमागच्छेयुर्न तान् मत्काव्यं स्वागतयिष्यति । यत इदं मत्काव्यं कतिपयदृशा कृशं निर्बलं चाऽस्ति । न चाऽहं साहित्यिकीं, धार्मिकीं, दार्शनिकीं,

सामाजिकीं वा कामप्यैकदेशिकीं विद्वत्तां दर्शयितुं सयत्नोऽस्मि । यतो 'यत्-किञ्चिदपि स्वं ज्ञानं महात्मनो हरिश्चन्द्रस्याऽनुकरणीयतया सत्यायैव समर्पितम्, नोऽवशेषितमहम्मन्यैः समालोचककोविदैर्वाग्युद्धाय । मत्काव्ये तेषां स्वागतमस्ति, आगच्छन्तु च ते, – ये महात्मानं हरिश्चन्द्रं जिज्ञासन्ते, दिदृक्षन्ते, अनुचिकीर्षन्ति, तद्भावे जिगमिषन्ति वा । किञ्चैतदवधार्यम्– मम ऽल्पविद्वत्तां, रचनादौष्ठवं वा विलोक्यैव स ुसा न कैश्चिदपि विद्वद्भिर्विरन्तव्यम्, यतोऽत्राऽन्यदेवाऽस्ति सूक्ष्मं समीक्षितव्यम्, आदेयं च– महात्मनो राजर्षेर्दिव्या सत्यभक्तिः, अचिन्त्यस्त्यागः, भूतमात्रे महनीयः स्वात्मभावः, योगिदुर्लभा साम्यबुद्धिः, लोकपालैरप्यनुकरणीयः कर्मयोगादर्शः, तथा राज्ञः प्रजावात्सल्यम्, प्रजानां राजभक्तिश्च ।

स्वादर्शे, स्वसंस्कृतौ, स्वगौरवे च गर्वहीना केचिदविदग्धा विद्वांसो मत्समीप एवमपि प्रश्नमकुर्वन्– 'किं भवता प्रचलिता आदृताश्चाऽन्यान्या भाषा अनादृत्य मृतभाषायामेतावान् यत्नव्ययः कृत इति । मयाऽपि यादृशो यक्षस्तादृशो बलिरितिन्यायमवलम्ब्य स्पष्टं प्रत्युक्तम्– 'अनादृतानामादरः, पतितानामुद्धारः, दलितानां सत्क्रिया सहानुभूतिश्चेत्येष एव नवसंसारस्य, विद्वत्तायाः, सभ्यतायाः, जागर्तेश्च सन्देशमहिमा ! किञ्च – नाऽद्यावधि त्वस्माकं शरीरशिरासु सांस्कृतिकस्य रक्तस्य प्रध्वंसाभावः । येन स्वसंस्कृतेर्मूलाधिष्ठात्रीं, सृष्टावाद्यां स्वःसन्देशवाहिनीं, सर्वप्रथममज्ञानान्धस्य मानवजगतो हिताय ज्ञानालोकप्रसारिणीं, त्रिकालावच्छेदेन जगति शान्तिस्वस्तिपथस्य प्रवर्तिकां भगवतीं संस्कृतमातरम् वयं न श्रद्दधीमहि, तत्प्रचारेण तद्दर्शितया लोकोद्धारदिशा च व्याहनिष्यमाण-स्वार्थानां भोगवादिनामालोचनाभयेन सतोऽपि तद्गुणग्रामस्य स्तुतिं न कुर्वीमहि, न वा भक्त्या सेवेमहि !

संस्कृतमातुर्मृतत्वे तु न जाने कस्य स्याद् दोषः ? –स्वत्वज्ञानगौरवशून्यानां, सर्वत्र (वृत्तौ, भाषायाम्, विचारे च) सर्वतोभावेन परभाषायाः परसंस्कृतेश्च दासतां वोढुमलज्जमानानाम्, काकवदुदरपूर्त्येकलक्ष्याणामादर्शशत्रूणां, हिन्दू-व्यपदेश्यानाम्, तत्राऽपि तस्याः (संस्कृतमातुः) रसेनैव जीवतां विद्वद्ब्रुवाणाम्?, किं वा तेषां विश्वस्यैव वा हिताय प्रयासं प्रयासं व्ययितस्वसारायास्तस्या मातुः ? चित्रीयेऽहं तेषां तथा ब्रुवतां निर्लज्जानां तृणलघूनां जिह्वामखण्डितां वीक्ष्य !

'नहि संस्कृतभाषा वर्तमानजगति कार्याय भवेत्' इत्यपि केषाञ्चिद् बाल-भाषितं कर्णगोचरं भवति । परमिदं तैः स्वात्मनैवाऽसंमन्त्य, 'केवलं स्वाम् वि-क्षिप्ततां साक्षात्कारयितुमुक्तमिव लक्ष्यते । यतः कोऽभिप्रायस्तद्वाक्यस्य– संस्कृत-भाषया प्रभूतार्थोपार्जनं न भवेदिति ? किं वा संस्कृतभाषायाम् ग्राह्यमेव किञ्चि-

न्नास्तीति ? । आद्यपक्षे– युक्तं तत्, नहि संस्कृतभाषा कस्यचिद् वर्गस्य शोषेण स्वार्थे कोषभरणाय कञ्चिदनुमन्यते । सा तु भगवती– 'तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्' इत्येवाऽनुशास्ति । तस्या ईदृशमपि स्वर्णशासनं ये स्वार्थाय दूषयन्ति, तेऽस्माकं दूरत एव नमस्कार्याः । द्वितीयपक्षे– प्राचीना अर्वाचीना वा ये भुवि सन्तो महात्मानो महापुरुषा वा जाता रामकृष्णबुद्धेशामसीहकन्फ्युसियसटालस्टायलेनिनगान्धिप्रभृतयः, न ते सर्वेऽपि तथा विश्वक्षेमङ्करं कञ्चिन्नवं सन्देशम् स्वमस्तिष्काद्उद्भावयन्, यद् भगवत्याः संस्कृतमातुर्ज्ञानकुक्षेरनुत्पन्नम् स्यात् । अस्मिन् प्रसङ्गे मुक्तकण्ठं निःशङ्कं चैतावदपि घोषयितुं शक्यते यत्– न वा भविष्यत्यपि जनिष्यमाणाः केचन विश्वहितचिन्तका विश्वशान्त्यै विश्वभावनां प्रचारयितुं तां, तन्निर्दिष्टां भावनां वाऽननुसृत्य किञ्चिन्नवमुपदेष्टुं पारयिष्यन्ते । किञ्च– राजनीतिकदृष्टिकोणेन समीक्षितेऽपि न संस्कृतकालेऽपि वेनसदृशाः समाजकण्टकाः निरङ्कुशाः शासकाः सदा 'नराणां च नराधिपम्' इति भावनया स्वस्तिमन्तोऽवस्थापिताः । नचाऽनन्तजनसंख्ये रामराज्य एकस्य क्षुद्ररजकस्येति युक्तिमत्यपि वार्तोपेक्षिता इत्यादि । नचाऽत्यन्तिकलोकक्षेमौपयिका आध्यात्मिका भावगरिमाणो भावीन्यपि परोलक्षाणि युगानि यावत् क्वचिदन्यत्राऽन्वेष्टव्याः ।

वस्तुतस्तु या काऽपि च भाषा स्यात्, सा केवलं वक्तुरेव भावं व्यनक्ति । भावस्यौत्तराधर्ये कथं नाम सोत्तरदायिनी ? तथात्वेऽपि 'तेन त्यक्तेन भुञ्जीथाः, यत्र विश्वं भवत्येकं नीडम्' इत्यादेर्मानवतायाः, विश्वबन्धुतायाः, विश्वशान्तिपथस्य च जगति सर्वप्रथमम् सन्देशात् तु सत्यं गृहीतं गृहीतमेव भाषाराज्ये संस्कृतेनाऽग्र्यं स्वर्णसिंहासनम् ! तर्हि किं नास्ति ग्राह्यम् संस्कृतभाषायाम् ?

किञ्चाऽभ्युपेत्याऽपि ब्रवीमि– कामं संस्कृतभाषा साधारणजनवाग्व्यवहारार्थे कस्मैचित्कालाय न भवेत्, ज्ञानप्रयोजनाय तु को निवारयेत् तामृते स्वल्पज्ञानसन्तुष्टेभ्यः ?

अलमेतेषां स्वल्पज्ञानदयनीयानामाक्षेपेण । युगानुकूलैः प्रगतिविकासहेतुभिर्लोकहितैर्नवनवैर्भावैर्वञ्चयित्वा सदैवमरुचिकर्या जीर्णदशायां यत्र तत्र शिक्षालयेषु प्रदर्श्य तस्या अनुपयोगिताम् प्रमाणयितुं दुःसाहसं कुर्वताम् केषाञ्चित् शिक्षाधिकारिणामाङ्ग्लसंस्कृतिक्रीतदासानां यदस्ति परिहासास्पदम् लज्जावहं च बुद्धिवैचित्र्यम्, तदेव वस्तुत आक्षेप्यं तु । किं वा घट्टकुटीप्रभातन्यायेन कस्तेषामप्यसत्कथाभिः पुनरिह स्वलेखनीमपवित्रयेत् !

अथवा किमेताभिर्गल्पभूमिकाभिः! विश्वबन्धुवादस्याऽग्रदूतिकायाम्

संस्कृतभाषायां ममाऽस्त्यनिवार्यो मानवीयकृतज्ञतासुलभो भक्त्यतिशयः । तनाऽस्यामेव महात्मनः सत्यवीरस्य राजर्षेर्हरिश्चन्द्रस्य सत्यगाथां गीत्वा स्वरसनामपावयम्, आत्मानमामोदयम् । यदिदमहं लेखितवान् न गर्वाय, न स्वाल्पविद्वत्तादर्शनाय, न कस्यचित् शक्तिविशेषस्य तोषणाय, न धनाय ! अपि तु केवलम् सत्यप्रेरणया सत्यदेवप्रसादाय, जनतात्मने तस्मै एव स्वकृतेः समर्पणाय ।

अकिञ्चिन्मूल्यस्याऽपि ममाऽस्य भक्तिबन्धस्य समादरमद्यत्वेऽपि गुणैकदृष्टयः केचित् कुर्वन्तः सन्त्येव । २००६ तमे वैक्रमाब्देऽस्य काव्यस्य प्रतिलिपिः स्थितिपारवश्याद् भारतस्य तात्कालिकसंयुक्तप्रान्तशिक्षामन्त्रिणः श्रीसंपूर्णानन्दस्य सचिवालये प्रकाशनाय प्रेषिताऽऽसीत् । एतत्काव्यप्रयुक्तनेपालीयाऽनुकरणवाचकशब्दमात्रपरिवर्तनाय तां प्रतिलिपिं प्रतिप्रेषयता तस्य व्यक्तिगतसचिवेन हरिचरणवर्मणा पत्र एवं लिखितमासीत्– 'अर्वाक् पञ्चषवर्षशतेभ्यो यन्न भारतेऽपि समुद्भूतम्, तस्यैतादृक्षस्य मनोहरस्य महाकाव्यस्य तथाऽङ्कुशितशिक्षे नेपाले (गतं राणाशासनम् लक्ष्यीकृत्य) समुद्भवः सत्यमाश्चर्यं सन्तोषञ्चावहतीति' । नैतत्स्वस्य महाकाव्यस्याऽत्मनो वा प्रशंसाऽपि तु यथावृत्तवर्णनमेव । अथवेत एवं समादरोऽस्य न स्यात्, तर्ह्यपि 'उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा, कालो ह्ययं निरवधिर्विपुला च पृथ्वीति' कस्यचन कविप्रकाण्डस्योद्गारेण सह ममाऽपि हृदयध्वनिः समवेदनतया मिलेत्, नाऽस्त्यत्र काचिदापत्तिः ।

अन्यच्च– देशसमस्यया जातु स्वस्यैव कारास्थितिः, जातु चाऽस्यैव काव्यस्येति नैतत्समाप्तचरमपि समये बहिःप्रकाशितुमशक्नोत् । अन्ततो मयि राणाकालिकसंसदि निर्वाचिते, ततोऽचिरेणैव राणाशासने चाऽपगते द्वयोरेव मुक्तिप्रभातोदयात् २००७ तमे वैक्रमाब्देऽस्य प्रथमं प्रकाशनम् तत्रभवतः श्रीदोर्दण्डपराक्रमशाहस्यार्थसाहाय्येन संपन्नमासीत् । पुनरिदानीम् (२०२७तमे वैक्रमाब्दे) वर्तमानसर्वकारस्य संस्कृतिविभागस्य साहाय्येनाऽस्य द्वितीयम् प्रकाशनम् जायमानमस्ति । येनाऽहं तं प्रति विशेषतः कृतज्ञोऽस्मि । तथा मुद्रणावसरे कतिपयसंशोधनदृशा मम साहाय्यं कृतवते, वर्तमाननेपालस्य संस्कृतव्याकरणधुरन्धराय संस्कृतविश्वविद्यालयप्राध्यापकाय (प्युठान.धिव सिने) श्रीहरिप्रसादशर्मणे, संस्कृतप्रधानपाठशालाध्यापकाय श्रीशुकदेवशर्मणेचाऽहं शतशो धन्यवादान् समर्पयामि । जयतु संस्कृतम् !

–लेखकः

विषयक्रमः सर्गः

राज्ञस्तपः, वरुणात् पुत्रवरप्राप्तिश्च	प्रथमे
शिशुना राज्ञोर्हर्षः, पाशिभयं च	द्वितीये
शिशुक्रीडया राज्ञोर्विनोदः, तदर्थे चिन्ता च	तृतीये
रोहितस्य वने पलायनम्, वरुणशापात् राज्ञो जलोदररोगश्च	चतुर्थे
रोहितस्य वनात् प्रस्थानम्, इन्द्रात् प्रतिवन्धश्च	पञ्चमे
राज्ञो रोगचिन्ता, तस्य सत्यनिष्ठाविषय इन्द्रस्य सभायाम् वसिष्ठ–कौशिकयोर्विवादश्च	षष्ठे
राज्ञो वरुणयागः, सर्वस्वदानम्, दक्षिणापूर्तये समयप्रार्थना च	सप्तमे
राज्ञः काशीप्रस्थानम्, प्रजाया असन्तोषश्च	अष्टमे
सपरिवारस्य राज्ञो मार्गक्लेशचर्चा	नवमे
काश्यां सपुत्रभार्यस्य राज्ञो विक्रयः	दशमे
द्विजगृहे राज्ञया दास्यक्लेशस्य चर्चा	एकादशे
श्मशाने राज्ञः स्थितेर्वर्णनम्	द्वादशे
अवशिष्टकथाभागः	त्रयोदशे

कथामुखम्

अद्य भूताभ्रनाकाक्षिवैक्रमाब्दस्य शैक्षिकम्
मध्याह्नमस्ति जगति ज्ञानविज्ञानभास्वरम् ! (१)

खद्योतस्येव मे काऽत्र गणना सौरमण्डले
नेदृगर्थे मन्ददीपम् इमं सन्दीपयाम्यहम् (२)

परमद्याऽपि शैलानाम् अन्तःप्रान्तेषु भूमयः
सन्तीदृशोऽपि यत्राऽस्ते सदा रात्रिः, सदा तमः (३)

तदर्थमेव मे यत्नः, तमसा भ्रान्तवर्त्मसु
तासु मन्दोऽप्ययं सत्यं मार्गं निर्देशयिष्यति (४)

किं वा शुभां सत्यगाथां साक्षात् ईशमयीं स्मरन्
गातुं समीहे, सत्यस्य प्रियो भक्तो, न कोविदः (५)

अयं काव्यनिबन्धस्तु सत्याभिनय एव मे
आशासे, स क्षणं विज्ञान् उत्कयेत्, परिहासयेत् (६)

"साकेतो" भारतावन्याः स कुक्षी रत्नभास्वरः
यतो जाताः शूरवीराः धर्मप्राणाः नृपाः पुरा (७)

जातु तत्राऽरुणो नाम सूर्यवंश्यो नृपोऽभवत्
सत्यव्रतस्तस्य पुत्रश्चाऽसीत् सौन्दर्यदैवतः (८)

स एकदा राजमार्गे नवोढां विप्रयोषितम्
वीक्ष्य कामवशीभूतो यौवनान्धो जहार ताम् (९)

तेन क्रुद्धो नृपः पुत्रं पुरात् निर्वास्य, पक्वणे
संस्थाप्य, स्वयमुद्विग्नः प्रययौ तपसे वनम् (१०)

पक्वणस्थो राजपुत्रः स्वस्य निर्वासने धियम्
ददतः स्वगुरोश्चाऽपि गां जघान पयस्विनीम् (११)

पितृक्रोधात्, विप्रपत्न्या हरणात्, गोवधात् अपि
त्रिभिर्दोषैरसौ लोके त्रिशङ्कुरिति विश्रुतः (१२)

तपस्यायै प्रयातस्य कौशिकस्य सपुत्रकाम्
पत्नीं त्रिशङ्कुर्दुर्भिक्षेऽपालयत् सदयस्तदा (१३)

स्वदुष्कृत्या स्वयं तप्तम्, आत्महत्योद्यतं च तम्
भक्तं देवी तद्वृजिनं हृत्वा राज्यमदापयत् (१४)

शोणप्रस्थाधीश्वरस्य देवरातस्य कन्यकाम्
सुतम् उद्वाहयामास हरिश्चन्द्रं महीपतिः (१५)

समर्थे स्वसुते, राजा यियासुः सतनुर्दिवम्
यागायोचे गुरुं किन्तु सद्यः स नाऽन्वमन्यत (१६)

'अन्यक्षेमस्य रोद्धे' ति शतधा स्वं वृथाऽक्षिपन्
स राजा गुरुणा शप्तोऽगच्छत् भूयः श्वपाकताम् (१७)

तपोनिवृत्तः पत्न्याश्च श्रुतवृत्तः स कौशिकः
नृपं प्रत्युपकुर्याम् किम् ?' इत्यपृच्छत् तथादशम् (१८)

'सदेहं स्वः नये'तीच्छां तस्य पूरयतो मुनेः
यज्ञे निमन्त्रिता नाऽयान् वसिष्ठस्य गिरा द्विजाः (१९)

'आस्ताम् अत्र क्रतौ कामं नागच्छन्तु द्विजब्रुवाः
तपोदीप्तस्य मे पश्येत् प्रभावाऽतिशयं जगत्' (२०)

इति सस्पर्धमात्मीयं तपः किञ्चित् वितीर्य सः
त्रिशङ्कुं सतनुं स्वर्गारोहणाय समादिशत् (२१)

एकातपत्रं क्व भुवः प्रभुत्वम् ?
क्व वा विगीतं श्वपचस्य दास्यम् ?
स्फुटं हरिश्चन्द्र-कथा ब्रवीति-
'कस्याऽपि न स्थायि भवेद् गुरुत्वम्'

—लेखकः

सङ्कीर्णे स्वार्थ-कूपे मां मग्नं दीनं समुद्धरन्
विशाले विश्वबन्धुत्वे नय सत्य ! यथाद्रुतम्

—लेखकः

प्रथमः सर्गः

भूपे शरीरेण दिवं प्रयाते
प्रजागणो न्यायविवेकदक्षः
संमन्त्र्य सत् संसदि राज्यसूत्रम्
तस्यैव पुत्राय ददौ सहर्षम्

१

ततो हरिश्चन्द्रमवाप्य योग्यम्
भर्तारमन्तःकरणे हसन्ती
साम्राज्यदेवी त्रपया प्रियाय[१]
हितं नवोढेव चकाङ्क्ष मौनम्

२

को वर्णयेत् तस्य परां महत्ताम् !
यं सर्वभूपेषु विविच्य मौलिम्
सापत्न्यशोकान् अपि विस्मरन्ती
चिराय शिश्राय [२]विशां हि भक्तिः

३

---

१ हितयोगाच्चतुर्थी ।

२ विशाम् प्रजानाम् । द्वौ विशौ वैश्यमनुजौ इत्यमरः ।

यस्मिन् गुणग्राहिणि राजरत्ने
नीत्या भुवं शासति तत्प्रजाभिः
न वृत्तयेऽजप्यत दैव-नाम
न लिप्सयाऽगृह्यत रत्ननाम

४

हर्म्ये गृहे संसदि पक्वणे वा
समं प्रसादं ददतं हिमांशुम्
जिगाय पक्षद्वितयेऽप्यखण्डं
तावत् प्रदानात् नृपमौलिरेषः

५

पात्रानुरूपैः स्वनयप्रयोगैः
नीत्या जितोऽनेन दिवाकरोऽपि
ग्रीष्मेऽपि काले सगुणेषु सत्सु
नाऽयं प्रयुङ्क्ते स इवोग्रनीतिम्

६

धनं कुबेरस्य न मर्त्यभूत्यै
विलासिनः स्वर्गपतेर्न वज्रम्
नचेतरेषामपि दिक्पतीनाम्
शक्तिर्मनीषा महनीयता वा

७

धनं च शस्त्रं च धियं च शक्तिम्
मनुष्यभूत्यै विनियोजयन्तम्
सृष्ट्वा नृपं तं विधिनाऽऽत्मतोषः
दिक्पालकानां पुरतो व्यदर्शि

८

स्वर्णैः स भूत्वैव गृहान् प्रजानाम्
भविष्यदर्थेऽनुबभार कोषम्
नद्यम्बुभिः कूपचयान् अभृत्वा
धाराधरः प्राक् भरते समुद्रम्

९

स निर्धनेऽभूत् विभवः, सरोगे
स औषधं निष्पितृके पिता सः
स निर्णयः सत्यमयो विवादे
क्वचित् सशोके स सहानुभूतिः

१०

अलक्ष्यलक्ष्या निजकान्तयाऽपि
राष्ट्रस्य, राज्ञश्च नितान्तभक्ताः
पुरस्कृता यस्य चरा अभूवन्
उत्कोचभीताः, न तु कालभीताः

११

वर्णस्थितिस्तत्र कृता श्रमस्य
विभाजनैरेव, न जन्मना तु
स ब्राह्मणो वेत्ति य एव वेदान्
स क्षत्रियः क्षत्रकृतिर्य एव

१२

त्रिवर्गसेवाविधिमस्य राज्ञो
मिथोऽविरुद्धं सफलं च वीक्ष्य
जुघोष पश्चात् स्मृतिरर्थकाण्डे
"धर्मार्थकामाः सममेव सेव्याः"

१३

तदातपत्रस्य हि शान्तिशीते
छायातले शर्ममये विहृत्य
तस्य प्रजा नो विविदुः कदाचित्
सत्यं निदाघेष्वपि तापपीडाम्

१४

दैत्यान् विजेतुं, त्रिदिवं च गोप्तुम्
यं विक्रमं दर्शितवान् स [१]आजौ
को विस्मरेत् तं किल देवलिप्याम्
स्वर्गस्य वक्षस्यधुनाऽपि स स्यात् !

१५

नीत्या जगत् हर्षयतोऽपि तस्य
[२]पुत्राऽजनेः चित्तमभूत् सशोकम्
गाढं तमो दीपकरण्डकस्या-
ऽप्यन्तर्भवत्येव विधेः स्पृहातः !

१६

रत्नाकरेऽदृश्यत वाडवार्चिः[३],
सुधाकरेऽङ्को, नृपतौ स खेदः
शङ्के— विशाला रुचिरोपलब्धीः
एकत्र नैव क्षमते विरिञ्चिः

१७

हव्येन देवान्, भरणेन लोकान्
पितॄंश्च कव्येन सभाजयन्तम्
तं धार्मिकं वञ्चयते सुतेन
सुदुर्विभाव्यं खलु दैवतन्त्रम्[४] !

१८

---

१. आजौ युद्धे ।

२. अत्र नाऽस्ति घटोऽनुपलब्धेरितिवत् पञ्चमी ।

३. अर्चिः शिखा । वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियामित्यमरः ।

४. तन्त्रम् निर्णयः । तन्त्रं प्रधाने सिद्धान्ते सूत्रवायपरिच्छद इत्यमरः ।

अन्याङ्गसौस्थित्यगृहीतगर्वः
पादाकृतिं वीक्ष्य गृहीतखेदः
केकीव रात्रिन्दिवमस्ति भूपः
बन्ध्यस्थितिं स्वाम् अशुभां समीक्ष्य

१६

पीत्वेव तस्यैव रसं बलिष्ठः
मुमूर्षुणाऽपि प्रतिकार्यभूतः
स शोकशत्रुस्तरुणो जिगाय
तं प्रत्यहं वृद्धदशां प्रयान्तम्

२०

तदा स सस्मार गुरुं वसिष्ठम्
तन्त्रेषु मन्त्रेषु च सिद्धहस्तम्
दृष्टैः असाफल्यवतां हि सत्यम्
अदृष्टमेवाऽन्तिम आश्रयोऽस्ति !

२१

राजा प्रजानां हृदयं, न तस्य
देहेऽस्त्यनिष्टस्य कुतोऽपि शङ्का !
अतः ससैन्यः किमु नाम यायात्[1]
द्वित्रैः अगच्छत् स वनं सहायैः

२२

तपोवने शान्तपथेन यान्तम्
नृपं सिषेवे पवनोऽनुकूलः
अलक्षिताः पक्षिगलैः अगायन्
अरण्यदेव्यश्च सुमङ्गलानि

२३

१. किंवृत्ते लिङ्लोटौ इति गर्हासंभावनायां लिङ् ।

दृशोः अनभ्यासवशात् रथेन
मृगादिकोऽरण्यपशुर्बिभीयात्
इत्यात्मदर्शी नृप आविवेश
स पादचारेण तपोवनान्तः

२४

श्यामा वनश्रेणिरिहैव मध्ये
मध्ये च ते पर्णमयाः कुटीराः
तत्तत्कुटीराच्च स यज्ञधूमो
निर्गत्य यावद्विपिनं पुनाति

२५

वृक्षाः फलैः स्वादुरसैर्विभिन्नैः,
[1]निर्हारिभिस्तैः कुसुमैश्च यत्र
विनश्वरे जन्मनि सारवस्तु
परार्थतैवेति निदर्शयन्ति

२६

एवं विशाले विभवे न किञ्चित्
नियन्त्रणं वा क्षतिरस्ति तत्र
दुर्भावनानां प्रथमं सवित्री
नियन्त्रणैवेति हि निर्विवादम् !

२७

श्रेणीप्रबद्धाः कति तस्य मार्गे-
ऽस्फुटप्रसूना लतिका-कुमार्यः
वार्तेरितैः पत्रमुखैः नृपालम्
अव्यक्तशब्दाः तदुदर्कमाख्यन्

२८

---

१ निर्हारिभिः सौरभसमाकर्षिभिः । समाकर्षी तु निर्हारीत्यमरात् ।

तपस्विनो वृक्षतलेषु केचित्,
कुटीषु केचिच्च, गुहासु केचित्
जगद्धितायैव हुतात्मसत्त्वाः
कृच्छ्रं तपस्यन्ति, यजन्ति चाऽत्र

२९

कामं तपेत् तिग्मकरः, स मेघो
वर्षेत्, स वायात् पवनः सवेगम्
व्रजेत् पुरो रङ्क उत क्षितीशः
संमुद्रय नेत्राणि तपश्चरन्ति

३०

सिद्धासनीभूय दशेन्द्रियाणि,
श्वासांश्च संयम्य, परां प्रबोध्य
सहस्रपर्णे कमले परेण
क्रीडन्त आनन्द्य युगं नयन्ति

३१

वल्कानि वस्त्राणि, कुशा विभूषा,
जटा च सा स्वर्णमयं किरीटम्
नमन्ति ते कस्य पुरो ? मृदोऽन्याः
विभूतयः, स्वात्मबलं हि संपत्

३२

स्निग्धाः कुरङ्गाः उटजाङ्गनेषु
रोमन्थमादाय सुखं वसन्ति
स्नेहार्पणात् तेषु हृदा मुनीन्द्रैः
तत्रैव तेषां महती स्वताऽस्ति

३३

स्नेहेन नूत्नानि तृणानि दित्सूः
तपस्विकन्याः सगलाभिभङ्गम्
अर्धप्ररूढैः अभिहत्य शृङ्गैः
उत्प्लुत्य खेलन्ति कुरङ्गशावाः

३४

'चींची' ति माधुर्यमयैर्निनादैः
कर्णौ हरन्तो विहगाः स्वनीडात्
यत्राऽवतीर्णा मुनिकन्यकानाम्
हस्तेषु नीवारकणान् चरन्ति

३५

दत्तं प्रकृत्या परिधाय बल्कम्,
पयोघटं न्यस्य कटौ समोदम्
यत्राऽभिषिञ्चन्ति कुटीरवृक्षान्
स्नेहामृतेनेव तपस्विबालाः[1]

३६

वातेन कस्याऽपि दलस्य पाते
तेषां कृतेऽश्रूणि पतन्ति तासाम्
स्ववर्धितानां सहसा विपत्तौ
सत्यं भवेदेव महान् विषादः

३७

ते ते कुमाराः यमिनाम् 'अदीनाः[2]
स्यामे' ति भावज्वलिताः प्रबुद्धाः
उन्निद्रयन्तीव शिलाः प्रसुप्ताः
भ्रमन्ति तत्रैव समित्कुशाय

३८

---

१. तापसकन्यकाः ।

२. अदीनाः स्याम शरद इति यजुर्वेदीयमन्त्रांशस्य सङ्केतः ।

अत्राऽस्ति वातावरणं विशुद्धम्
भूतानुकम्पातिशयात् मुनीनाम्
यत् चित्त[1]धन्वन्यपि हिंस्रकाणाम्
मिथः स्रवताम् अङ्कुरयत्यजस्रम्

३९

यत्र स्वतन्त्राः शुकसारिकाश्च
[2]'द्यौः शान्ति'रित्याशिषमामनन्ति
किं तत्र शान्तिर्न हसेत्, न नृत्येत्
वातेऽन्तरिक्षे, सलिले, स्थले वा !

४०

वृक्षैः स्वयंसेविभिरुच्चनिष्ठैः
छायाप्रदानात् इव शान्तिपूर्णा
तपोमही न क्षमते कदापि
तापात्मनश्चण्डकरस्य तापम् !

४१

तत् तादृशं पुण्यवनस्य दृश्यं
पश्यन्, विमुह्यन् नृपतिः प्रदोषे
गुरोः कुटीं प्राप पलाशिवृन्दैः
शाखाङ्गुलीभिः परिचायिताध्वा

४२

लब्ध्वा हृदयेशस्य
शीतलममृतैर्मृदुकरस्पर्शम्
अवगुण्ठनमवतार्य
तामसमहसत्तमामसौ रजनी

४३

---

१. समानौ मरुधन्वानौ इत्यमरात् मानसमरुभूम्याम् इत्यर्थः ।
२. द्यौः शान्तिरन्तरिक्षं शान्तिरिति यजुर्वेदमन्त्रांशस्य सङ्केतः ।

आलिङ्गन्त्याः प्रेष्ठं
　　तस्या हृदये, मुखे कुतोऽप्यमिताः
हर्षा भूमौ अपतन्
　　यत्र तत्र सुधामयूख-रूपेण

४४

तारामयैः सुरत्नैः
　　समुज्ज्वला सा मनोहरा शाटी !
सा व्योमसरित् रसना !
　　किं सा रजनी जगत् न मोहयतु ?

४५

ज्योत्स्नाधवले कुटयाः
　　अजिर उषित्वा परःशता हरिणाः
अङ्के निधाय शावान्
　　जिघ्रन्ति पुनः पुनः सवात्सल्यम्

४६

पर्णकुटीरविटङ्क-
　　नीडेषु वसत् कुलं कपोतानाम्
पक्षोत्सङ्गे शावान्
　　न्यस्य 'माकुरमाकुर'-रवं तनुते

४७

यमिनो मुनयः सायं-
　　सवनान्ते कुशासन-समासीनाः
क्रोडे न्यस्य कुमारान्
　　कथयन्ति पुरातनीः शुभा गाथाः

४८

एवं कुलपतिमुख्ये
तत्र गुरौ अपि विधिं समाप्तवति
विनयनतः स महीपो
न्यवेदयत् तं हृदो व्यथां रहसि--

४६

"तपसा भूतस्वान्तं
करकङ्कणवत् समं विलोकयताम्
भवतां पुरो मया किम्
उद्घाटयं स्यात् निजं स्वान्तम् ?

५०

भवतां कृपया नान्यत्
प्रार्थ्यमपूर्णं च मे ! वरीवर्ति
किन्त्वेका मां नित्यं
वन्हिशिखावत् हि बन्ध्यता दहति !

५१

शान्तं विपुलं राज्यम्,
स्निग्धा प्रकृतिः, महत्तमं स्थानम्
तत् सममनपत्यस्य
ममाऽस्त्यजस्रं गुरो ! शुचे, न मुदे

५२

सा पर्णकुटी पुरतः
न तत्र पर्यङ्करल्लकाः न धनम्
पर्णमयं छदिरस्ति
परमर्भक-खेलया मनो हरति

५३

देवाः, पितरो, लोकाः
न क्वाऽप्यवहेलिता हृदाऽपि मया
हन्त ! तथाऽप्याधिरयं
परिणामः स्यात् नु कस्य दुरितस्य ?

५४

आचक्ष्व योगदृष्टे !
पत्रवदवलोक्य मत्कृतान्यभितः
प्रारब्धस्य विलासः
किमुताऽयं प्राक्तनस्य कलुषस्य ?

५५

"मागा नृपाल ! शोकम्
मुनिवत् नियतेन्द्रियो वसन् विपिने
तपसाऽऽराधय वरुणम्
तत आप्स्यसेऽतिपराक्रमं तनयम्

५६

यत्पुण्यमयी गाथा
द्युषदामपि मुहुर्मुहुः श्रुतीः स्पृशति
तद्भुवतः क्षेमपथे
प्रत्यूहो वा कथं कुतो भवति ?

५७

लोकान् उपकुर्वाणम्
प्रत्युपकारोद्यता वनप्रकृतिः
तपसः कठिने समये
चारु सिषेवे स्वसंपदा नृपतिम्

५८

सा भोजनाय कन्दैः
परिधानाय द्रु-बल्कलै रुचिरैः
संवेशाय च मृदुलैः
वृक्षपलाशैः असेवत क्षितिपम्

५९

शान्त्या धर्ममहिष्या,
रात्रिन्दिवमङ्गरक्षकैः हिंस्रैः,
हरिणैः स्निग्ध-सुहृद्भिः,
शुकपिकयूथैश्च गायकैः शतशः

६०

[1]बन्ध्यत्वाधि-निशीथे
जीवन-कालं तमोमयं नयतः
दैवात् किमपि मुहूर्तम्
ज्योतिर्मयमग्रतोऽभवत् नृपतेः

६१

किञ्चित् दिव्यं तेजो
भौमं छित्वा प्रसृत्वरं जालम्
अन्तः प्रवेक्ष्यतीव
तत्र समीरोऽन्यथा ववौ मृदुलः

६२

सहसा प्रादुर्भूया-
ऽमर्त्यरुचा चर्चितेन रूपेण
पार्शी जगाद भूपम्
साक्षात् सिद्धयेव तं सरस्वत्या[2]-

६३

---

१. बन्ध्यताजनितमनोव्यथारूपेऽर्धरात्रे इत्यर्थः ।

२. गीर्वाग्वाणी सरस्वतीत्यमरः ।

"राजन् ! भवतस्तपसा
सत्यं निघ्नीकृतं मम स्वान्तम्
पाणौ मम शक्तिमये
संभाव्यते यत् यथेप्सितं वृणु तत्"

६४

"यदि मयि तुष्टो देवः
पुत्राभावात् अहं परं खिद्ये
चन्द्रेण पुत्रमयेन
जीवन-रात्रिं मम प्रकाशयतु

६५

भ्राम्यन् अपि लोकेषु
पितृऋणपञ्जरे सदा निबद्धोऽहम्
नाऽनन्दमनुभवामि
पञ्जर-शुकवत् परैर्जगत् भ्रमितः"

६६

"सत्यं वदामि राजन् !
वेधा निटिले हि तावके तनयम्
लेखितुमिव विस्मृतवान्
लेखित्वाऽपीतरान् महाविभवान्

६७

प्रकृतिजनेषु समेषु
ख्याता ते पुत्रभावना जगति
का ते पुत्रे तृष्णा !
राजन् ! निजां तां शुचं समाधेहि

६८

किरणैः शिशिरैः स शशी
महनीयोऽस्त्यन्यसंपदाम् स्थानम्
किन्तु दिवा-राज्येन
केवलमेकेन वञ्चितो विधिना !

६९

स्थावरजङ्गमजगतः
भरणं, विलयं सदा विधातुमलम्
अब्धेः सत्त्वं सलिलम्
प्रतीपगत्यैव वञ्चितं विधिना !

७०

तस्मात् पुत्रं त्यक्त्वा
राजन् ! अन्यत् समीहितं वरय
सन्त्यन्या अपि जगति
तास्ता महिता विभूतयः शतशः"

७१

"भालेऽलिखितं वस्तु
दातुं नाऽलं दिवौकसोऽपि यदि
विधिलिखितस्यैव कृते
तर्हि किमर्थं नु ते ह्युपास्यन्ते ?

७२

अमरोत्तम ! वाग्दम्भैः
नार्हसि शरणागतं प्रतारयितुम्
सत्यं पुत्राऽभावे
जीवितुमिच्छा न मेऽस्ति बन्ध्यस्य !"

७३

"बन्ध्यत्वस्य शमाय
यदि निर्बन्धं पुनः पुनः कुरुषे
नष्टेऽस्मिन् बन्ध्यत्वे
यष्टव्योऽहं त्वया स्वपुत्रेण"

७४

सुत–तृषयाऽकुलितोऽसौ
नृपोऽनुमेने तथा प्रतिज्ञानम्
दूषितमणुकीटमयं
सलिलं सहसा तृषाऽभिभूत इव

७५

इति प्रथमः सर्गः

द्वितीयः सर्गः

दिक्सुन्दरीभिरमितैर्हसितप्रकाशैः
धौतेव, वाऽमरवधूभिरधीरवृत्या
क्षिप्तैर्विलासकलहे मणिरत्नचूर्णैः
व्याप्तान्तरेव रजनी मधुरं जहास

१

भूमीगतं रुचिरवस्तु किमप्यपूर्वम्
उत्कण्ठया परमयेव दिदृक्षमाणः
तारागणोऽभि धरणीं चलचाकचक्याम्
दृष्टिं क्षिपत्यविरतं नभसो गवाक्षात्

२

ज्ञात्वैव निर्जरगुरोः प्रसवानुकूलम्
स्वर्गानिलः कमपि सन्दिशतीव कालम्
आसन्नसूतिसमयाम् अभिगम्य राज्ञीम्
निर्याति सत्वरमसौ अवरोधरन्ध्रात्

आयाति मासि दशमे रुचिरे मुहूर्ते
ज्योत्स्नाप्रसारधवले प्रसवप्रकोष्ठे
शैव्या नृपालमहिषी सुषुवे कुमारम्
सद्भाविता मतिरिवोज्ज्वलमात्मतोषम्

४

सूत्यन्त एव कुशलाः प्रसवस्य कृत्ये
राज्ञी-स्पृहां कुसुमितां प्रतिपालयन्त्यः
'जातः कुमार' इति गद्गदिताः प्रमोदैः
संभ्रम्य सूतिसदने महिला अबल्गन्[1]

५

'किं नाम लोकहितसाधनमस्ति तत्त्वम् ?'
इत्येव चिन्तनपरं प्रथितोच्चनिष्ठम्
पृथ्वीपतिं समदिशत् सुतजन्म कोऽपि
वातो यथा सुरभिजन्म रसालवृक्षम्

६

वर्णा अपि श्रुतिपुटे मधु वर्षयन्ति
मर्त्योऽपि सन्दिशति दिव्यमपूर्वशर्म !
एतत्त्वसंभवमितीव नृपः क्षणं तु
'को मे भ्रमोऽय' मिति चित्रमिवाऽवतस्थे

७

सूतेः गृहात् नरपतिं, नृपतेः अमात्यान्
तेभ्यश्च पौरजनमित्यविलम्बमेव
प्रातस्तनो मलयवात इव प्रसर्पन्
सन्देश एष सुरभिर्जगदाननन्दत्

८

---

१. बल्गन्ति दन्तिनिवहा इतिवत् ।

राज्ञो मनोरथतरोः मृदुलं प्रसूनम्,
ज्योतिः प्रशान्तमधुरं हृदयस्य राज्ञ्याः,
सत्याशिषां परिणतिर्मधुरा प्रजानाम्
कस्योत्सवाय न बभूव शिशुः स जातः !

९

हासेषु, गीतिषु, गतेषु तथा मुखानाम्
मुद्रासु, हृत्सु, लपनेषु च तत्प्रजानाम्
हर्षः स एव तनुते स्म निजं प्रकाशम्
नक्षत्रनाथ इव वीचिषु निम्नगानाम्

१०

हर्म्येषु, देवसदनेषु, सदोगृहेषु,
घण्टापथे, नृपपथे, जनतातनूषु
प्रत्येकमङ्गनिवहे समवाप्तभूषा-
ऽयोध्यापुरी सुरपुरीव भृशं दिदीपे

११

स्नेहस्नुता च महिषी चिरजातमेतम्
उत्सङ्गरत्नमवलोक्य तदेकभावम्
याताऽऽत्मनि, स्वतनये च भिदां न जज्ञे
व्यस्माययत् स्थितिरियं ह्यवरोध-वर्गम्

१२

राजा शिशोः प्रकृतिलब्धमवार्यवृत्ति
श्रुत्वाऽपि 'चाहँ' रुदितं परितप्यतेऽन्तः
अन्हाय सूतिगृहमेति सबाष्पकण्ठम्
पृच्छत्ययं शिशुरितः किमु रोदितीति

१३

[1]सन्तानतर्षमपनीतवतोंहि राज्ञोः
एवं सुवर्णसमयेऽमितमोदपूर्णे
स्वप्ने प्रजागर इव प्रतिबन्धरूपः
ग्राविर्बभूव वरुणः सहसाऽन्यरूपः

१४

नीडे सुधांशुधवले प्रियशावमेकम्
पक्षान्तरे मृदु निधाय सुखं स्वपन्तौ
व्याधः कृपाणहृदयो द्विजदम्पती तौ
हा हन्त ! लक्षयति तिक्ष्णशरेण रात्रौ !

१५

दृष्ट्वाऽपि तं द्विजसरूपतया समेतम्
संत्रस्तवान् नृपतिरस्य मनो विजानन्
ग्रन्तःकृपाविरहितस्य न साधुवेषः
शक्नोति दर्शकमनः प्रणयेन भर्तुम्

१६

पाशी जगाद नृपतिम्-- 'नृप ! किं प्रतिज्ञाम्
स्मृत्वा न पूरयसि, तिष्ठसि मोदमग्नः ?
ग्रात्मेव जन्मनिगडात्, तुहिनात् इवाऽर्को
मुक्तोऽसि पैतृक-ऋणात्, प्रतिदेहि पुत्रम्'

१७

बद्धाञ्जलिर्विनयभारनतः स राजा
प्रोचे स्मितेन कृतकेन जलाधिनाथम्-
'ग्राम्, देवदेव ! भवताऽहमसीमतापात्
पाशात् विमोच्य नितराम् ग्रनुकम्पितोऽस्मि

१८

---

१. सन्तानतर्षम् सन्तानाभिलाषम् । कामोऽभिलाषस्तर्षश्चेत्यमरः ।

किन्त्वाधि[1]–वन्हिशिखया हृदयं विदाह्य,
स्नात्वा चिरेण करुणैः गलदश्रुपूरैः
तेनैव कल्पसदृशीः शरदोऽतिवाह्य
संप्रार्थ्य देवचरणान् मणिरेष लब्धः

१९

अस्मिन् गते सपदि तज्जननी कथं नु
तिष्ठेत् ?, विदीर्णहृदयेन कथं नु जीवेत्
लोके हि मातृहृदय–म्रदिमातिरेको
वर्ण्योऽस्ति केन, भगवान् सममेव वेत्ति

२०

तत् प्रार्थये नतशिराः–– 'भगवन् ! परश्वः
सत्यं भविष्यति शिशोरपि नाम–कर्म
तृष्णाशमाय मृदुलस्य हृदो, दृशोश्च
तावत् विलोकयतु पुत्रमुखं वराकी"

२१

पारुष्यपूर्णमपि तत् वरुणस्य चेतः
श्रुत्वैव तस्य वचनं म्रदिमानमाप
सप्रश्रयं मृदु वचो रसयेत् क्षणेन
दाधीचमस्थ्यपि, कथैव परा हृदस्तु

२२

तस्मिन् गते नरपतिः सहसा सशङ्को
गत्वाऽऽमृशत् सकरुणेन करेण बालम्
झञ्झानिले व्यपगते परिशङ्कितात्मा
मालीव निष्कुटगतं[2] प्रियबालवृक्षम्

२३

---

१. आधिर्मनोव्यथा। पुंस्याधिर्मानसी व्यथेत्यमरः ।

२. निष्कुटगतम् गृहोपवनवर्तिनम् । गृहारामास्तु निष्कुटा इत्यमरः ।

तोयाधिपेन क्रियते समयाय मिथ्या–
स्नेहेन दत्ततनया शिशुरित्युपेक्ष्य
देवी तदा वनभुवि 'क्व गमिष्यती' ति
व्याधेन दत्तपृथुका हरिणीव हृष्टा

२४

जातोऽद्य पूर्वसुकृतादिव दुर्दिनान्तो
भावी च सोऽस्ति घनशोक इतोऽतिदूरे
तस्मात् प्रसीदति निरन्तरमेव राज्ञी
पुत्रेन्दुनाऽतिविमलेन शरन्निशेव

२५

स्नेहेन पूर्णहृदया महिषी तदङ्गम्
यत् यत् विलोकयति, चुम्बति तत्र तत्र
उत्थाप्य वक्षसि, गले, वदने च जातु
संयोज्य तन्मुखमनन्तमुदं तनोति

२६

दिव्यान् सुधातिमधुरान् अननुभूतपूर्वान्
स्वप्नान् समाह्वयति, कर्षति, चुम्बतीव
स्मेरोज्ज्वलं स्वमधरं स्फुरयन् स मन्दम्
बालः समुत्क्षिपति कोमलपाणिपादम्

२७

देशो नवोऽपरिचितो, नव एव वेषो,
भाषा नवा, हृदयरोचकता नवैव
आयाति दृक्पथमतः स शिशुः क्षणेन
चित्रीयते, हसति, पश्यति कौतुकेन

२८

मोदावहैर्मृदुभिरस्फुटितैर्वचोभिः
सन्देशमेष वितितीर्षति दिव्यमत्र
किन्त्वस्य भावमधुरां न विदन्ति भाषाम्
लोकाः, ततः पतति रोदिति भग्नलक्ष्यः

२९

गाढं विरक्तमपि रञ्जयति प्रगाढम्
सन्तप्तचित्तमपि शीतलयत्यसीमम्
विश्वं विसारमपि भासयते ससारम्
सामर्थ्यमासु शिशुकेलिषु कीदृगस्ति !

३०

मन्ये– मधुर्भवति वस्तुषु निर्मलेषु
पीत्वैव यं न विरिरंसति चित्तमेतत्
तत् निर्मलैर्यतिजनैः, शिशुभिः, सरोभिः
स्पृष्टस्य नास्ति हृदयस्य यथेच्छवृत्तिः

३१

मृष्ट्वा सतीं मलिनतां विमलीकृतं तत्
साधोर्मनो नहि शिशोर्मनसैति साम्यम्
यत् तन्मनो मलिनतानुपलब्धसङ्गम्
अस्पृष्टधूलिनवदर्पणवत् चकास्ति

३२

चञ्चत्स्मिते चलशिशोरधरे प्रशान्तम्
ज्योतिः परात्मन उदेति, चकास्त्यमन्दम्
तत् पुण्यदर्शनमहो हृदयं किमीयम्
नो मोहयेत्, न रसयेत्, गमयेत् न शान्तिम् !

३३

उत्सङ्गशायिनमिमं स्तनपं स्मितास्यम्
यावत् विलोकयति पूर्णमनोरथा सा
देवी न राज्यमतुलं न च सौधमेव
वेत्ति, स्वसन्ततिहृदो ह्यबलाः प्रकृत्या !

३४

इति द्वितीयः सर्गः

तृतीयः सर्गः

'अन्य एव कुत एष मारुतः ?
सौरभं कुत इदं नव-प्रियम्'
एवमेव विमृशन् नृपः क्षणात्
सन्ददर्श गुरुमन्तिकागतम्

१

शीघ्रमर्घ्यसहितैर्हि साधनैः
तं समर्च्य विधिसन्निभम् गुरुम्
भूपतिः समयवित् कृताञ्जलिः
उक्तवान् विनयभक्तिमत् वचः--

२

"अष्टसिद्धिभिरुपासितस्य ते
मादृशः किमुपसाधयेत् प्रियम्
किं तथापि करवाणि भो गुरो !
शाधि शिष्यकमिमं यदृच्छया"

३

आमृशन् स मुनिरेकपाणिना
दुग्धफेनधवलां स्वदाढिकाम्
चालयन् इतरतश्च मालिकाम्
स्फाटिकीं नृपतिमाह सस्मितम्--

४

"त्वर्यतामथ निमन्त्रणादये
बान्धवस्य, नगरोत्सवाय च
प्राप्तवान् नृप ! तृतीयहायनम्
पुत्र एष तव, चौलमागतम्"

५

भूप आह महिषीमुखं सकृत्
वीक्ष्य भीत इव सूक्ष्मवेदनः---
"किं तृतीयमतिवाह्य हायनम्
चौलकर्म न विधातुमिष्यते ?

६

कामये झटिति नो पला अपि
यान्तु, कल्पसदृशः सदैव ताः
सन्तु, तानि रजनीदिनान्यपि
पूज्य ! चौलदिनमापतेदिति"

७

मर्मवित् सहृदयो मुनिः क्षणम्
ध्यानमग्न इव मौनमास्थितः
स्नेहपूर्णहृदयेन बालकम्
वीक्षमाण इदमाह भूपतिम्----

८

"अस्तु तर्हि शिशुरेष वर्धताम्,
चौलकर्म समये करिष्यते
हायने क्षितिप ! पञ्चमेऽथवा
सप्तमेऽपि शुभमाह नारदः"

९

इत्युदीर्य नृपसग्निभिर्मुनौ
ब्रह्मवर्चसमयेऽथ निर्गते
पूर्वशैल इव सूर्यनिर्गमे
सौध आशु विरलप्रभोऽभवत्

१०

एकदाऽस्फुटगिरा स्वमातरम्
पृष्टवान् सकुतुकं स बालकः---
"मत्प्रसूस्त्वमसि, मत्पितुः प्रसूः
नास्ति किं जननि ? नो विलोक्यते

११

मत्पिताऽहमिव किं न रोदिति ?
याचते न च कदापि पूरिकाम् ?
कश्च सान्त्वयति तं सचुम्बितम् ?
कश्च तोषयति पूरिकां ददत् ?"

१२

तन्निशम्य हसता मुखेन सा
पुत्रमाह परिचुम्ब्य तन्मुखम्---
"वत्स ! पुष्पनिचयं विचित्य सा
पूजनाय सुरमन्दिरं ह्यगात्

१३

जातु पुष्पवसना प्रभामयी
स्वप्नसुन्दररथेन नीरवम्
ऐति, [1]ते पितरमात्मसौरभैः
साधु तर्पयति, साधु चुम्बति
१४

अस्ति दूरगगनस्य मध्यतो
रत्नदीप्तिमहितं महत् पुरम्
तत्र सन्ति कति वत्स ! पूरिकाः,[2]
पर्पटाः, वटक-पिण्डिकादयः
१५

तत्र सन्ति कनकस्य पक्षिणः
कामपुष्पफलिनः पलाशिनः
वाजिनः पवनवेगगामिनः
दन्तिनश्च बहुदन्तशोभिनः
१६

तत्र किं त्वमधुना यियाससि ?
यासि चेत् अचिरतो नयाम्यहम्"
तत् निशम्य सहसैव हर्षितः
कौतुकात् नय, नयेति सोऽब्रवीत्
१७

साऽऽह– "किन्तु जनकः प्रकुप्यति,
नाऽहमेमि, सुत ! तत्र सांप्रतम्
त्वां विसृज्य भट आगमिष्यति,
किं मया विरहितोऽपि वत्स्यसि ?
१८

---

१. लक्ष्मीपते ! तेऽङ्घ्रियुगं स्मरामीतिवत् 'ते' इत्यस्य स्वतन्त्राव्ययशब्दत्व-स्वीकारात् वाक्यादौ प्रयोगेऽपि न दोषः ।

२. पूरिकादयः खाद्यरोटिकाविशेषाः ।

तत् निशम्य सहसा स बालको
भीतभीत इव साश्रुलोचनः
गाढगाढमुपगूह्य मातरम्
प्राह– "नाऽहमपि यामि तर्हि तु !"

१९

सा ततो विरहकातरं मृदु
स्वात्मजस्य हृदयं विजानती
जग्मुषी च हृदयेन भाविनीम्
अस्य शोकघटनां व्यदूयत

२०

भूपतिः सुतममंस्त साऽवधि
पाठ्यपुस्तकमनर्घबोधदम्
येन सत्यपितृताऽनुशील्यते
सा च भूतनिवहे प्रयुज्यते

२१

साऽङ्गलक्षणततिः शतायुषः
सा च मर्मघटनाऽस्य भाविनी !
स्यात् ऋतम् कतमदित्यसौ नृपः
चिन्तितः, शतश आगमा अपि

२२

सूचयन् इव सुदूरगामिताम्
स्वस्य, जीववसतिं च चञ्चलाम्
रोहितः सजवमग्रतो ययौ
मातुरङ्कत इतः सखीन् प्रति

२३

शिल्पिनेव कुशलेन कल्पितम्
लक्षितं सकलराजलक्षणैः
ओजसा परिवृतं च तद्वपुः
सौधमेव भृशमुज्ज्वलम् व्यधात्

२४

क्रीडनस्य परमप्रियः सुहृत्,
आधिनाऽपरिचितः स बालकः
कूर्दते सखिभिरेकलक्ष्यकैः
सौधभूपरिसरे चलत्कचः

२५

सन्निवृत्य तत आत्मनः कृतिम्
वर्णयन्, स्वपितरौ च नन्दयन्
मोदते स निटिले श्रमाम्बुभिः
बिभ्रदच्छतम–मौक्तिक–श्रियम् !

२६

भूपतिस्तमवदत्– "प्रियात्मज !
तोषितोऽस्मि तव वीर्यकर्मणा
किं ददानि वद पारितोषिकम्
हस्तिनं किमथवा तुरङ्गमम्"

२७

सोऽपि लज्जित इवाल्पवीक्षणः
हर्षधौत इव भास्वराकृतिः
कौतुकात् प्रतिवचोऽर्थिनः पितुः
स्निग्धमङ्कमधिरूढ उक्तवान्—

२८

"[1] द्राक् विधेहि वपुषा भवत्समम्
मां, ततो वितर चाऽश्वमुच्चकम्
कानने मृगरिपून्, मृधेऽसुरान्
हिंसितास्मि समुपेत्य यं श्रितः

२९

मोदहेतुरपि तत् वचो हृदि
प्राप्तमेव नृपमाकुलं व्यधात्
कर्णहार्यपि, तथाऽक्षिहार्यपि
सव्यथे मनसि न प्रियङ्करम्

३०

निष्ठुरेण समयेन दर्शिता
रोहितस्य वयसः प्रदर्शिनी
सप्तमी जवनिका समामयी
भैरवीव नृपसंमुखेऽभवत्

३१

तस्य दुर्नियति-नाटकं सति
पूर्वरङ्ग इव चौलकर्मणि
संप्रवर्तयितुमिच्छुरप्पतिः
तत्र नायक इव ह्युपस्थितः

३२

प्रार्थितो बहु तदापि भूभुजा
यादसां पतिरुवाच तं स्मितैः--
"यापितेऽपि ननु वर्षसप्तके
भूपते ! न विरता तवाऽर्थना ?

३३

---

[1] द्राक्संबन्धः विधेहीत्यनेनैव ।

अस्तु, किन्तु पुनरीदृशोऽर्थनाः
सन्तु नो, व्रतदिने गते शिशोः
स्वां प्रतिश्रुतिमिमां न विस्मरेः,
तिष्ठ संप्रति, निवृत्तवान् अहम् "

३४

इत्युदीर्य चलितेऽथ पाशिनि
सौधभूमिरहसत् सदुत्सवैः
हर्षगीतिमनिशं जगुः प्रजाः,
शान्तिशीतल उवाह मारुतः

३५

इति तृतीयः सर्गः

चतुर्थः सर्गः

अद्य श्व इत्येवमियाय भूयान्
कालः प्रजाक्षेमसुखेन राज्ञः
को वा विलम्बः ? सुखवासराणाम्
यानेऽविदित्वैव हि ते प्रयान्ति !

१

आसीत् नृपः शान्तिमये प्रमोदे,
प्रापत् पुनस्तापमये विषादे
सैषा स्थितिर्जीवनवाटिकायाः
प्रफुल्लति, म्लायति पर्ययात्[1] या

२

शून्ये क्वचित् निश्चितमद्य वा श्वः
स्वजीवनालम्बनमेष्यतीति
निर्धारयन् एवमहो ! किमीयः
आत्मा न चिन्ताकवलीकृतः स्यात् ?

३

१. अय धातोर्घञर्थे कविधानात् पर्यय इति निष्पद्यते । तेनाऽत्र पर्ययशब्दः पर्याया-
र्थकोऽस्ति ।

काले व्रतार्हस्य नृपात्मजस्य
जातं यथावत् व्रतबन्ध-कर्म
किन्तूत्सवोऽमन्यत तत्र लोकैः
देहैः सभूषैर्न तु मानसेन

४

वाष्पाकुले दीनदृशौ स्वपित्रोः
वीक्ष्य, प्रजानां च सशोकमास्यम्
किं वा कथं वेति स राजपुत्रः
पृष्ट्वाऽप्यलब्धोत्तर आप चिन्ताम्

५

परं पुरा बालक इत्यनास्थैः
जनैः कृताः स्वं प्रति शोकशब्दाः
नित्यत्वमात्मीयमुदीरयन्तो
धीरं जुगुञ्जुः श्रुतिगह्वरेऽस्य

६

नितान्तशून्ये समये विभीतः
'प्रस्वं स वात्सल्यमयीम् अपृच्छत्--
"किं कश्चिदायास्यति मां जिघांसुः ?
मातर्मयाऽचर्यत, कोऽपराधः ?

७

उत्सङ्गभूमौ विहरामि पित्रोः,
खादामि तत्स्नेहकरेण दत्तम्
न वेद्मि नामान्यपि सेवकानाम्
कस्याऽचरं मातरिहाऽपराधम् !

८

---

१. प्रस्वम् मातरम् ।

स्वैरं स्वपित्रोर्नयनस्थितोऽपि
बालो वृथाऽन्येन निहन्यते चेत्
तर्ह्यस्य कः स्यात् शरणं नु मातः !
किं जीवनं तस्य वृथैव याति ?

९

किं वा क्वचित् दूरपलायितस्य
क्षेमं भवेत् मे ? वद, तत् करोमि
अहर्निशं रोदिषि किं ? ममाऽपि
हृदः क्षतं क्षारयितुं ततोऽपि"

१०

'निरागसं त्वां प्रतिवक्तुमद्य
नाऽलं स्वयं निष्करुणोऽपि मृत्युः
किं मातृवात्सल्यमिति'– स्वदृग्भ्याम्
सा प्रत्यवोचत् रुदिताकुलाभ्याम्

११

चेक्लिद्यमाना नयनाम्बुवर्षैः
किंकृत्यवातेन च कम्पितात्मा
सा दुर्दिनस्येव लता न शेके
नेतुं स्थितौ स्वां, स्वसमाश्रितं च

१२

क्रोडीकृतेऽस्मिन् सविधेऽस्ति पाशी,
पलायिते चाऽपि हता प्रतिज्ञा
किंकृत्यमूढाऽन्तरदह्यताऽसौ
शोकात्– 'इतो व्याघ्र इतस्तटी' ति !

१३

क्षमार्थिनोऽन्यानपि निग्रहार्हान्
जुगोप या शक्तिमयी सहस्रम्
साऽद्य स्वपुत्रं क्षमते न गोप्तुम्
शक्तिर्हि कालस्य, न मानुषस्य !

१४

शोकाकुलायाः सहसा महिष्याः
अलीयतोच्छ्वास उदित्य शून्ये
हृत्स्पन्दनं जातमतिप्रमाणम्
देहोऽप्यवालोक्यत दारुभूतः

१५

स रोहितो मातरमाप्तमूर्च्छाम्
अशक्नुवन् द्रष्टुमिवाऽधिबाणैः
बेभिद्यमानो हृदि नष्टधैर्यो
बभ्राम सर्वा अपि सौध-कक्ष्याः

१६

सर्वा दिशस्तस्य तमःप्रलिप्ताः
बभूवुरर्चिस्तपनः समीरः,
क्षणः स कल्पैः सदृशो, जगच्च
श्मशानवत् शून्यमशान्तिपूर्णम्

१७

बालेन्दुना येन समस्तमेव
सौधाम्बरं प्राप महाप्रकाशम्
आक्रम्यमाणे घनदुर्नियत्या
तस्मिन्, ययौ तच्च महान्धकारम्

१८

हितैषिणाम् अश्रुमयी समीक्षा
नैराश्य-सन्देशमदत्त तस्मै
अवर्धयत् मौनमसह्यमाधिम्
आश्वासनं मृत्युतटं निनाय

१९

विधौ विरुद्धे सति केन को वा
त्रायेत, तत् शक्तिमतोऽप्यचिन्त्यम्
वराक आशाकरुणां तथाऽपि
दृष्टिं क्षिपत्यात्मजनेषु साऽस्रम्

२०

"सखे ! पलायस्व वनं, त्वरस्व,
कोणे निलीयस्व कुतोऽपि गत्वा
शृण्वन्, विजानन् अपि किं मुमूर्षुः
विलम्बसे ?, याह्यधुनैव याहि

२१

उञ्छेन, भैक्ष्येण, मृगादिना वा
निरुह्यते वृत्तिरसंशयेन
को जीवनं व्यर्थमहो ! जहाति
'जीवन् नरो भद्रशतानि पश्येत्'

२२

एवं वयस्यस्य स मन्त्रदीपात्
किंकृत्यता– सन्तमसं निरस्यन्
प्रस्थातुकामोऽन्ध इवाप्तदृष्टिः
स्फुटं स्व-यातव्यपथं ददर्श

२३

रात्रिः कचानाम् अतिकालकालैः
जालैः समाच्छाद्य दिशो, मुखेन
सर्वं धराऽऽलोकरसं पिबन्ती
साक्षात् पिशाचीव पुरः समायात्

२४

दध्वान साँ-सेंति तमः प्रगाढम्,
झिल्लीगणो झङ्कृतवान् अरण्यम्
दिवान्धयूथं कटु संरुराव,
शिवागणोऽमङ्गलमाजुहाव

२५

'शोचेत् क एतां घटनां विलोक्य
वृथे' ति मेघावरणच्छलेन
स कोमलात्मा विधुरश्रु शीतम्
निपातयन् व्योमगृहे निलीनः

२६

मासेन माघोऽस्ति, शिराशिरासु
घनीकरिष्यन्निव देहरक्तम्,
प्रकम्पयन्, कट्कटयंश्च दन्तान्
उवाह वातो हिमशीतशीतः

२७

दृष्ट्वा तथा कान्तिमतीम् अयोध्याम्
तनूमिवाऽभा-रहिताम् अजीवाम्
देवाङ्गना नो विविदुः कटिस्थान्
घटान् स्थलात् प्रस्खलितान् विषादात् !

२८

सौवर्ण–सोपान–परंपरासु
'गडत्' 'गडत्' कारमधः पतन्तः
घटाः समे स्फूर्जथुहेतुभूताः
अकम्पयन् द्याम्, अवनीं च शश्वत्

२९

उद्धूय तासां मुखतः प्रगाढम्
विषादतामिस्रमुपर्यवन्याः
वितानभूतं घनभावमेत्य
प्रावर्षयत् वारि घटैर्विभिन्नैः

३०

संघट्टनात् स्वर्मणिकुट्टिमेषु
तेषां घटानां मणिनिर्मितानाम्
सुवर्णसूत्राकृतयः सहस्रम्
विद्युत्प्रकाशा उदिताः क्षणाय

३१

स्थलेषु मर्मर्, सलिलेषु कल्कल्,
वृक्षेषु छर्छर्, पटलेषु बर्बर्
इति स्वनन्ती घननीरधारा
पपात दन्तावलहस्तभीमा

३२

बालः क्व यातीति विषाद-नीला
स्नेहार्द्रचित्ता सरयूरजस्रम्
तरङ्गकेशान् कुटिलान् किरन्ती
पतन्त्यरोदीत् करुणं नदन्ती

३३

राजा निशीथे वरुणेन रोषात्
सार्पेण पाशेन गले निबध्य
आकृष्यमाणं गलदश्रुधौतम्
दीनाकृतिं स्वं तनयं ददर्श

३४

स्नेहेन, शोकेन च कृष्यमाणे
'मा मा' वदत्येव नृपे प्रचेताः
आदाय बालं तरसा प्रतीचीम्
ययौ, अभूत् तूर्णमतीन्द्रियश्च

३५

हा ! वत्स वत्सेति नृपेऽनुयातुं
प्रवर्तमाने मणिभित्तिरेतम्
ललाटघातेन विशब्दमाख्यत्
स्वप्नोऽयमित्यस्तविधौ निशीथे

३६

सार्धं प्रबोधेन यथा स शान्तिम्
लेभे, तथा सौधगृहे जनानाम्
कोलाहलात् प्राप च दिष्टशप्तः
सहैव शान्त्या महतीम् अशान्तिम्

३७

"हा ! मे हृदो ज्योति ! रिमाम् अभागाम्
निमज्य यातोऽसि तमस्यगाधे
मां मुञ्च नो, दर्शय तं स्वमार्गम्,
विसृज्य सर्वं मुदिताऽनुयामि

३८

प्राणायित स्निग्ध ! गृहं समेहि
क्व यासि विस्मृत्य त्वदीयमङ्कम्
क्षणार्द्धमेवाऽपि समेत्य वत्स !
त्वमुत्सवो मे भव दृग्द्वयस्य

३९

आलिङ्गितः प्रावरणैर्मया च
पर्यङ्कतूलास्तरणेऽपि सुप्त्वा
वक्षि स्म शीतम्, कथमद्य वाते
तीक्ष्णासिधारे व्यथितः प्रयासि

४०

विष्फोटयन्ती गिरिगण्डशैलान्
वज्रोपलैः, स्फूर्जथुभिश्च घोरैः
एषाऽस्ति वृष्टिः, स शिशुः क्व यातः ?
क आश्रयैस्तं विपदोऽभिरक्षेत् ?

४१

प्रकम्पयन्ती तटभूमिभागान्
तरङ्गतुङ्गा सरयूः वहेत
यातः क्व मे प्राणशिशुर्निशीथे
हा दैव ! किं विध्यसि मामभागाम् ?

४२

स्यात् पिच्छिलं वर्त्म नभोजलेन
ध्वान्ते कुतो गच्छति सूचिभेद्ये
दुरुत्तरे क्वाऽपि पतेत् स गर्ते
क उद्धरेत् तं सदयस्तदानीम् ?

४३

दशेत् भुजङ्गो विषदंष्ट्रया वा
मार्गे क्वचित् तत्पदघातरुष्टः
भैषज्ययेत् स्नेहहृदा क आशु
हा दैव ! कां कां विपदं स यायात् !"

४४

एवं लपन्त्येव महिष्यकाण्डे
हर्षात् सखित्कारमसौ जहास
हासो हि फेनः स समस्ति नीरे,
क्षीरे विषाक्तेऽमृतमिश्रिते च !

४५

यतो यतः सा क्षिपति प्रहृष्टा
कुतूहलाश्चर्यमयी स्वदृष्टिम्
ततस्ततः स्मेरमुखं ददर्श
प्राणायितं पुत्रमनन्यरूपम्

४६

देवी दिशासूपदिशासु, भूमौ,
विहायसे चोर्ध्वमधश्च पुत्रान्
ददर्श वात्सल्यकणान् इव स्वान्
बहिस्तदाकारतया प्रकीर्णान्

४७

स्वमात्मजं पश्यति यत्र यत्र
साऽऽलिङ्गितुं धावति तत्र तत्र
अरुद्धहासा श्लथकेशपाशा
विक्षिप्तचित्तेव विलोकयते सा

४८

सुकोमलात्मानमसत्यभीरुं
यावत् नृपं सा घटना बबाधे
ततोऽप्यबाधिष्टतरां प्रतिज्ञा--
'सन्तोषयेयं कथमम्बुदेवम् ?'

४९

सन्देश एष प्रससार वायौ
सन्तापकक्ष्वेड इव क्षणेन
गतच्छविः शीतमयाश्रुदीना-
ऽयोध्या प्रभातोपतटे प्रबुद्धा

५०

ध्वान्तं शुचः सान्द्रयतीव राज्ञो
हार्दं क्षतं क्षारयतीव भूयः
पाशी प्ररुष्यन् बहिरेव लब्ध्वा
सन्देशगन्धं ह्युपभूपमायात्

५१

वीक्ष्यैव तं भूमिपतौ भयेन,
त्रासेन, दैन्येन, महाह्रिया च
निघ्नीकृते साञ्जलि वक्तुकामे
प्रोचे स पाशी प्रथमं प्ररुष्टः--

५२

"विभीतवत् नाटयसे मुखं च
पुत्रे गते हस्तिनिमीलिकां च
जानामि कापटचमयोऽसि राजन् !
जलोदरग्रस्ततनुर्भव त्वम्"

५३

शप्त्वैव सोऽन्तर्हितवान्, नरेशः
स्मृत्वा भविष्यत् सहसा चकम्पे,
अमुञ्चदश्रूणि समीपवर्गः,
सौधः शुचा मौनमिवाऽललम्बे

५४

इति चतुर्थः सर्गः

पंचमः सर्गः

स्नेहेन नोदितो राज्ञो व्याधिना च बलात्कृतः
मन्त्री राजसुतं यत्र तत्राऽन्वेषयितुं गतः

१

पाताले वा प्रविशतु, समुद्रे वाऽवगाहताम्
कोऽस्ति यो नाऽभिलक्ष्येत चरैर्योग्यमहीक्षितः

२

स ददर्श वने क्वाऽपि सान्द्रच्छाये तरोस्तले
शिलासने दीनमुखं विच्छायं राजनन्दनम्

३

शोकतापैः पीतरसं कृशं व्याक्षिप्त–मूर्धजम्
धूलिधूसरितं कञ्चित् अनाथमिव तं स्थितम्

४

वीक्ष्यैव मन्त्रिणं बालः स्पृष्टो भीतयाऽऽश्रयेण च
सबर्बरं दृगम्बूनि मुमोच स्फुरिताधरः

५

शुचा विवर्णरूपं तम् अनुमित्यैव लक्षितम्
वीक्ष्यैवाऽश्रूणि संरोद्धुम् सोऽपि नाऽपारयत् तदा

६

पितुर्निशम्य वृत्तान्तं राजपुत्रः शुचाऽर्दितः
हृदि शूलैर्विद्ध इव विललाप तदग्रतः

७

निवृत्य स्वगुरोरर्थे दित्सन्तम् अपि जीवनम्
मन्त्री तं वारयामास राजतन्त्रविचक्षणः

८

प्रबोध्य कस्यचित् वृद्ध-तापसस्य समाश्रये
निभृतं बालकं न्यस्य स्वपुरं स न्यवर्तत

९

'वरं राजकुलोच्छेदात् आत्मनोऽनृतभागिता !'
इत्युच्चधीः स आचख्यौ नृपं सूनोः अदर्शनम्

१०

न जाने क्व सुतो यातो, भर्ता चाऽस्ति महातुरः
किं विपत्सहनायैव राज्ञी सृष्टा जगत्सृजा ?

११

शोकद्वयेन प्रहृता महिषी भर्तृपुत्रयोः
हिमवाताऽऽहता मृद्वी लतेव कृशतां गता

१२

राज्ञी तमेकं सुखदं लभते स्वाप्निकं क्षणम्
यदोत्सङ्गे भवेत् पुत्रो, नृपतिश्च निरामयः

१३

इतश्च रोहितः स्वप्ने पितृभ्यां परिचुम्बितः
प्रातरुत्थाय धिक्कारैः आहते साश्रु मस्तकम्

१४

प्रसूहीनो व्याधभीतो मृगपोत इव श्वसन्
अशान्तात्मा बहून् निन्ये स वने शोकवासरान्

१५

स्वप्ने सौधस्थितिः, पित्रोः वात्सल्यं स्मृतितन्तुषु
न स्याताम् यदि, दीनात्मा स कथं नाम जीवतु !

१६

प्रतिजज्ञेऽविचार्यैव पिता,ऽस्मिन् विपदागता
'पित्रोः कर्म फलत्येव सत् असत् वाऽपि सन्ततौ !'

१७

'किं जीवनं, कथङ्कारम् तत् च यायात् समूल्यताम् ?'
इत्येव वनदृश्येषु निर्विण्णः स व्यचारयत्

१८

प्रकृतिश्च सुजिज्ञासुं तं वसन्तादिनामकैः
प्राबोधयत् जीवनस्य तत्त्वं षड्तुपुस्तकैः--

१९

"शीतवातातपा एते प्रकृतेः परिवृत्तयः
सुखदुःखे च, तत् धीरो नैव तानि विचारयेत्

२०

क्लेशतोऽपि परार्थाय धार्यं जीवनमात्मनः
परार्थताऽमृतं लोकेऽमरभावाय तां श्रयेत्"

२१

एवं प्रकृतितोऽवाप्य संक्षिप्तं कर्मदर्शनम्
विविक्ते तरुमूले स स्वां स्थितिं पर्यचिन्तयत्---

२२

'को भवेत् शून्यहृदयः स्वार्थी वा मत्समो भुवि
यः स्वतातकृते मांसपिण्डं स्वं न जिहासति

२३

अन्ते वार्धक्यहस्तेन, रोगहस्तेन वा ध्रुवम्
ग्रहीष्यत्येव मां मृत्युः कैवाऽस्था क्षणजीविते !

२४

क्लेशयित्वा तु पितरं जीवन् अपि मृतोऽस्म्यहम्
वरं मृतोऽपि जीवामि तदर्थेऽर्पितजीवितः

२५

सतृषे जलसन्देशं ददत् अन्यार्थजीवनः
कूपस्थः स वरो भेको, न नरः स्वार्थचिन्तनः

२६

परार्थकिरणः सूर्यः, परार्थकिरणः शशी
परार्थरत्नो जलधिः, परार्थफलिनो द्रुमाः

२७

जीवनं स्वार्थघृणितम् केषाम् अस्ति महात्मनाम् ?
धन्यास्ते ममता–पाशात् ये विमुच्य सुनिर्वृताः!

२८

रक्षणेऽस्य शरीरस्य कियत् दुःखम्, कियत् भयम् !
परार्पणे कियत् सौख्यम् कियती कृतकृत्यता !

२९

यो रहस्यमये लोके दत्तवान् मम जीवनम्
तदर्थे तददाने स्यात् कियती मे कृतघ्नता !

३०

पितृनाशे कथं जीवेत् माता मे भर्तृजीवना?
जीवितेन मया कोऽर्थः पितरौ एव निघ्नता ?

३१

गर्भदुःखानि निर्वेश्य मया सा यदि दुःखिता
तर्ह्यहं नृकुले जात ऊर्णनाभोऽश्वकोऽपि वा

३२

स्वार्थे मे चेष्टमानस्य कियत् सङ्कुचितं मनः
परार्थे ध्यायतोऽप्यद्य कियत् विकसितं पुनः !

३३

तत् अद्यैव गृहं गत्वा स्वस्य जीवन-पाथसा
तातस्य रोगज्वलनम् आशु निर्वापयाम्यहम्

३४

एवं विविच्य विपिनात् प्रस्थितेऽस्मिन् गृहं प्रति
शतमन्युस्तस्य मार्गे मूर्तो विघ्न इवाऽगमत्

३५

पन्थानम् अवरुध्यैव तमुवाच 'स सस्मितम्--
"अविविच्य समं वत्स ! तव कोऽयम् उपक्रमः ?

३६

वत्स ! ज्ञानेन येन त्वम् एवं प्रस्थितवानसि
न तत् ज्ञानम् भवेत्, तत्तु ज्ञानाभासो मतो मम

३७

---

१. स इन्द्रः ।

'परार्थता जीवनस्य फलम्'– इत्यसती मतिः
केनाऽहो दुरदृष्टेन हृदि ते कोमलेऽङ्किता ?

३८

वद, त्वयैव विश्वस्तौ सूर्याचन्द्रमसौ यदि
परार्थौ, किं नार्पयतो राहवे स्वस्य जीवनम् ?

३९

यावत्सृष्टौ जीवनस्य नैवोद्देश्यं परार्थता
सा तु जीवनलक्ष्येषु संभवत्यनुषङ्गतः

४०

परिणामादिना शीर्णाः नृणां हस्तादयो यथा
गृध्राद्यर्थाः, तथा वत्स ! प्रसवा अपि शाखिनाम्

४१

परार्था यदि वृक्षाः स्युः पान्थसंकण्टहेतवः
उत्पद्यन्ते कण्टकिनः छिन्ना अपि कथं पथि ?

४२

रत्नाकरः परार्थश्चेत् कोषे ह्यावर्तदुर्गमे
किं सञ्चिनोति रत्नानि ? को वाऽर्थो ग्राहरक्षिणाम् ?

४३

पश्येत् स कथमन्यार्थो दीनान् रत्नप्रवञ्चितान् ?
जिघृक्षून् अपि रत्नानि किं निमज्ज्यैव मारयेत् ?

४४

यथाऽनुषङ्गात् रत्नाप्तिः तस्मात् स्वार्थपरात् अपि
तथाऽन्यस्मात् प्राप्तिरपि तादृगेवाऽनुषङ्गिकी

४५

ईदृशोऽपि परार्थाः स्युर्यदि, नष्टधनादिकाः
नरा अपि परार्थाः स्युः चौरादीनां प्रपूरणात्

४६

तत् जीवने परं लक्ष्यम् ऋते स्वार्थप्रपूरणात्
नाऽस्ति, वत्स ! प्रवर्तस्व तस्मात् 'तस्यैव पूर्तये

४७

वत्स ! जीवननिर्माणे स्वार्थस्तत्त्वं, परा कला
पृथ्वीं च त्रिदिवीकर्तुं मन्त्र एष महान् मतः

४८

परार्थतैव शास्त्रादौ श्रेयसी चेन्निरूपिता
वृद्धोऽपि ज्ञात-शास्त्रोऽपि पिता त्वां किं जिघांसति ?

४९

परार्थत्वं परेशस्य संमतं चेत् कथं नराः
परार्थाः तेन योज्यन्ते दुःखैः, स्वार्थपराः सुखैः ?

५०

तस्मात् स्वार्थाग्रतः सन्ति न पिता, न च बान्धवाः
स्वार्थो जीवनवृक्षस्य मूलं, तत् रक्ष सर्वतः

५१

त्यक्त्वा सद्यःफलं स्वार्थं परार्थत्व-निषेवणम्
प्राप्तं कपोतम् उत्सृज्य श्वो मयूराऽभिकाङ्क्षणम्

५२

किं मुमूर्षसि मन्दात्मन्! पारेजीवनमस्ति किम् ?
इह भोगाः सन्ति, तत्र तदीयाः स्मृतयो घनाः

५३

---

१. तस्यैव स्वार्थस्यैव ।

मृत्वा किं कुरुषे ? तातं तमेकं जीवयिष्यसि
जीवित्वा तु प्रजाः सर्वा जीवयिष्यसि नित्यशः

५४

निश्चिन्तं तिष्ठ, ते तातो गतिं यातु स्वकर्मणः
त्वयेदानीं जीवितोऽपि सोऽन्ते किं न विपत्स्यते ?

५५

जीवयित्वा तातमेकं स्ववंशं च्छेतुमिच्छसि ?
बहुना किं वत्स ! जीव, 'जीवन् भद्राणि पश्यति'''

५६

सवितण्डं वचः श्रुत्वा शक्रस्यैतत् स बालकः
तत् तथैवेति निर्धार्य स्वावासं संन्यवर्तत

५७

इति पञ्चमः सर्गः

षष्ठः सर्गः

भूपश्च रोगेण बलात् गृहीतो
मृत्योः करेणेव सुदारुणेन
बद्धाञ्जलिः प्राह तपस्विराजम्
अमेयशक्तिं स्वगुरुं वसिष्ठम्––

१

"स्वयं विषण्णोऽस्मि रुजाऽनयैव
मज्जीवनाः सा महिषी, प्रजाश्च
आख्याहि तत् सर्वविपत्तिमूलम्–
'एषा निरस्येत कथं समूलम् ?'

२

नो चेत् त्वमेवाऽदिश मृत्यवे माम्
येनात्महत्या–कलुषात् प्रमुच्ये,
अस्मात् च रोगात् मरणादसह्यात् ?
'सह्यो हि मृत्युर्न चिराय कष्टम् !'

३

न चित्तशान्तिर्न च देहशान्ति,:
न देशकार्यं, न समाजकार्यम्
जीवामि भस्त्राश्वसितो विधातः !
तिष्ठामि डित्थस्थितिरर्थशून्यः

४

पुण्योपलब्धा खलु कर्मभूमिः
एषाऽस्ति मे संप्रति शोकभूमिः
तीव्रस्पृहस्याऽपि कृषीवलस्य
शक्त्या विहीनस्य यथोर्वरा भूः

५

कामं प्रजाः सन्ततिनिर्विशेषाः
भक्त्यैव मे सर्वमुपाहरेयुः
तथाऽपि सेवाऽक्षम एष आत्मा
तत्स्वेदभारं क्षमते न वोढुम्

६

संरक्षणायैव गुरो ! प्रजानां
राज्यासनं मे, न कलेवरस्य
शुश्रूषितुं सामयमेतदेव
नेच्छामि तत् संप्रति [1]ताः प्रतार्य

७

नरो विपाकस्य तु नाऽधिकारी,
भवेत् असौ कर्मण एव भूम्नः
अकर्मणः किं मम जीवनेन ?
चेत् ईशभावेन जगत् न सेवे

८

१. ताः प्रजाः ।

वरं म्रिये संप्रति, सत्यदेवं
प्रयाच्य कर्मक्षममन्यदेहम्
इहैव पुण्ये सरयूपकण्ठे
स्मरन् प्रजाः स्वस्य पुनर्जनिष्ये

९

सूर्यः, शशी, वात इमे नदाश्च
कुर्वन्ति कर्माणि जगद्धिताय
अकर्म किं जीवनमस्ति धार्यम्
यत्-जीवनं प्राणिति कर्मणैव!

१०

कर्मैव सद्योनिमदग्धसत्वं,
सद्भावनां ज्ञानममर्त्यतां च
ददाति तद्वञ्चित एष देहः
किं रक्षणीयो वितथं भराय

११

न कर्मशून्यो निजमेव भव्यं
संप्रार्थये सृष्टिनृपं परेशम्
स्वार्थी प्रजानां कुशलेष्वनास्थो
ललाटदर्शीव नृपोपसेवी

१२

अहं तु तस्यैव विराज एकः
संरक्षको बाहुरधर्म्यनीतेः
संरक्ष्य पृथ्वीं, स्वमुदात्तकर्म
समर्प्य, तं प्रीणयितुं समीहे"

१३

निशम्य तत् तं समुवाच भूयो
मुनिर्जगत्क्षेमकृतां प्रतीक्ष्यः––
"मदुक्तमङ्गीकुरुषे यदि त्वम्
अद्याऽप्यहं वच्मि तदेव भूयः

१४

'कश्चित् समर्थोऽपि हि बालमेकम्
त्राता च नेता च भुवः स रक्ष्यः'
इति प्रजानां समितौ त्वदर्थे
सहस्रकृत्वो नृप ! निर्णयोऽभूत्

१५

तत् मन्मतं लोकमतं च राजन् !
लोकस्य भूत्यै न तिरस्कुरुष्व
विपद्यतां कोऽपि शिशुर्न शोच,
भूयात् अविघ्ना तव सत्यसेवा

१६

यस्यैव शापेन रुजं गतोऽसि
तं क्रीतपुत्रेण यजस्व भूप !
बहुप्रकारेषु सुतेषु शास्त्रे
क्रीतोऽपि तेष्वेकतमः स्मृतोऽस्ति

१७

चेत् नैवमङ्गीकुरुषे–– प्रतिज्ञा
हता, हतं सत्यमथ स्वयं च
हतः, प्रजाश्चाऽपि हताः, त्वया सः
याज्यः शिशू रक्षित एक एव !"

१८

'अल्पस्य हेतोर्बहु हातुमिच्छा
सत्यं न युक्तें'त्युदयद्विचारम्
आकारमुत्प्रेक्ष्य नराधिपस्य
भूयोऽपि तं प्राह स संयमीन्द्रः--

१९

"किन्त्वद्य याताऽस्मि दिवं मघोनः
सन्देशमादृत्य, ततो निवृत्य
इष्टयै समेष्याम्यधुना तु नास्ति
शुक्रास्तभावात् अपि सत् मुहूर्तम् !"

२०

ततः स्वकर्तव्य-विनिश्चयेन
शान्ति गतः स क्षितिपोऽवरोधम्
विवेश, योगेन तपोधनोऽपि
प्राप्ति श्रितः सन् त्रिदिवोपकण्ठम्

२१

व्यवस्थितौ, संपदि, सभ्यतायाम्,
नीतौ च सर्वोपरि लब्धकीर्तिम्
स्वर्गं मुनिः प्राप सुराङ्गनानाम्
गीतानि तद्द्वारत एव शृण्वन्

२२

रुनु झुनु रुनु झुनु ....
अल्पसुकर्मन् भृङ्ग यियासो !
पुष्पमुखस्थं मे मधु पीत्वा
त्वं भुवि चाऽन्यं भृङ्गमजस्रं
म्लान-सुमस्थं वर्णय गत्वा ! – रुनु झुनु ......

(क)

नृत्यमिदं मे नन्दनवाते
चञ्चलमध्यं हावसुरम्यम्
मर्मरगीतं पल्लवहस्त--
व्यञ्जकरम्यं वर्णय गत्वा ! –रुनुझुनु ......

(ख)

स्वर्णमृगाणां निर्भयकेली–
मञ्जुलमानन्दैकनिधानम्
नन्दनहर्म्यं मे मणिधारा–
निर्झररम्यं वर्णय गत्वा ! –रुनुझुनु ......

(ग)

स्वर्झरिणीवाते कणशीते
सौरभधौते स्वर्णप्रदोषे
दयिते चूते मे प्रणयस्या–
ऽमन्त्रणमेतत् वर्णय गत्वा ! –रुनुझुनु ......

(घ)

वीक्ष्यैव तं मानधनं शमीन्द्रं
स्वरङ्गनानां प्रशशाम केली
काश्चित् न्यलीयन्त भियेव कुञ्जे
काश्चित् व्रतत्यन्तरिता बभूवुः

२३

देशाय, धर्माय, सते च धर्म–
रणे मृतानाम् अमरत्वभाजाम्
ज्योतिर्मयीर्मूर्तिततीः प्रपश्यन्
माणिक्य–वीथ्या स ययौ सुधर्माम्

२४

प्राप्ते सभाद्वारि महर्षिमुख्ये
सभासदां स्वागतवाङ्मिषेण
मुदा सुधर्मैव सहस्रकण्ठ-
स्वरेण तं स्वागतयाञ्चकार

२५

कः सत्यसन्धोऽस्ति नरः पृथिव्याम् ?'
प्रश्नोऽयमिन्द्रस्य न पूर्ण आसीत्
स एव भूयः सकुतूहलं तैः
अकारि सभ्यैर्मुनिपुङ्गवेऽपि

२६

सोऽवर्णयत् संसदि मुक्तकण्ठम्--
"सत्यप्रियोऽखण्डितसत्यनिष्ठः
नरो हरिश्चन्द्रसमः पृथिव्याम्
नाऽभूत् पुरा, नाद्य च कोऽपि दृष्टः"

२७

ससर्वसंमत्यपि तस्य वाक्यम्
नैवाऽनुमेने कुशिकात्मजस्तु
'सेर्ष्यो हि साध्वीमपि पूर्ववैरात्
संमन्यते नैव विपक्षवाचम्'

२८

स सावहित्थं कृतक-स्मितेन
गाम्भीर्यमन्दं स्फुरताऽधरेण
[1]न्यूनीकरिष्यन्निव मौनिराजम्
आक्षेपगर्भैः अवदद् वचोभिः---

२९

---

१. न्यूनीकरिष्यन् गर्ह्यां करिष्यन्। हीनन्यूनावूनगर्ह्यौ इत्यमरः।

'नाऽभूत् पुरा, नाऽद्य च कोऽपि दृष्टः'
एवं तु नैवोचितमस्ति वक्तुम्
भागेष्वनन्तेषु भुवो महत्याः
विद्यात् क ईदृक् मनुजोऽस्ति नो वा !

३०

वीरोऽस्ति, विज्ञोऽस्ति, जनप्रियोऽस्ति
परं स सत्योऽस्ति न वा ? न विद्मः
आशामुखेभ्यो वितरेत् द्विजेभ्यो
न तावता सत्यमयो भवेत् सः

३१

पृथ्वीतले केचन सन्ति विप्राः
आदर्शहीना उदरस्य भक्ताः
ये ज्ञातशास्त्रा अपि पिण्डदातॄन्
स्तोतुं त्रपन्ते न मृषा-प्रलापैः

३२

किं तादृशाम् एव वचांसि शृण्वन्
एवं महात्माऽपि भवान् ब्रवीति ?
किं वा स सत्यव्रत एव नो चेत्
महोदरः स्यात् कथमद्य शापात्!"

३३

निशम्य गाधेस्तनयस्य वाचम्
वसिष्ठ ईषत् स्मयमान ऊचे---
वृथैव निन्देः किमु सत्यभक्तम् ?
वदामि गर्वेण– 'स सत्य एव' !

३४

'अलब्धपिण्डैः अतिनिन्दितोऽपि
प्रलब्धपिण्डैः अतिवन्दितोऽपि
नाऽन्यो भवेत् सत्यधनो महीपः
वरं स निष्पक्षदृशा विलोक्यः'

३५

एवं ब्रुवाणेऽथ मुनौ वसिष्ठे
पुरन्दरः प्रस्तुतवान् ततोऽन्यत्
स कौशिकः प्रस्फुरिताधरोऽपि
किञ्चित् विधित्सन् इव मौनमास[1]

३६

इति षष्ठः सर्गः

१. प्रयोगबाहुल्यात् गतीत्याद्यर्थकात् अस् धातोः प्रयोगो वृत्त्यर्थे ।

सप्तमः सर्गः

ददाति राजा द्रविणं तदर्थे
विक्रेष्यते को नु सुतं स्वमेवम्
उच्चैरघोषीत् नृपझर्झरोऽपि
गृहे गृहे, संवसथे, पुरे च

१

कश्चित् द्विजो लोभवशात् नृपाय
नाम्ना शुनःशेफमदत्त पुत्रम्
सत्यं विचित्रा नियतिः !, पशुत्वं
प्राप्नोत्यगत्या बत ! मानवोऽपि

२

ततः प्रवृत्ते नरमेधयज्ञे
स यूपबद्धो वटुकोऽतिदीनः
रुरोद तारं करुणं च हन्त !
स्वजीविते कस्य नु न स्पृहा स्यात् ?

३

तत् क्रन्दितं, तत् मुखमश्रुधौतम्,
नेत्रे च ते तस्य निराशदीने
नाऽपारयन् वीक्षितुमृत्विजोऽपि
स्यात् कस्य वा तत् हृदयं शिलायाः ?

४

मध्येमखं गाधिसुतो दयार्द्रो
हस्तस्य खड्गेन दयाश्लथेन
पशूकृतं विप्रसुतं सुदीनम्
आलप्स्यमानं जनमित्यवोचत्--

५

[1]"शामित्र ! भो ! मा जहि, मा जहीमम्
यदृच्छया गच्छतु, मुञ्च मुञ्च
लब्धा नृपो यज्ञफलं ममैव
गिरा, वटु संप्रति मुञ्च, मुञ्च

६

तथा हतं बालमहो ! समक्षे
को नाम रक्षोहृदयोऽभिपश्येत्
न लोचने काचमये, न लौहं
चित्तं, न वा प्रेतकुले जनिर्नः

७

सृष्टौ मनुष्योऽपि मनुष्यमेव
निहन्ति चेत् हन्त ! विनाऽपराधम्
किं राक्षसास्तर्हि विगर्हिताः स्युः !
अतः किमत्याचरितं वराकैः ?

८

१ यज्ञियपशुवधकारी शमिता एव शामित्र इति स्वार्थेऽण् ।

यद्यात्मभावेन समस्तजन्तून्
नो वीक्षते, नो दयते मनुष्यः
किं वा फलं तस्य मनुष्यतायाः ?
वरं स घासं चरतात् वनस्थः

९

त्वदुद्यतं खड्गमिमं विलोक्य
सत्यं निराशा-व्यथितोऽस्ति बालः
शामित्र ! तत् मा जहि, मा जहीमम्
यदृच्छया गच्छतु, मुञ्च मुञ्च !"

१०

निशम्य तत् भूपतिरक्षियुग्मं
विस्फार्य, सङ्कोच्य ललाटरेखाः
किञ्चित् कषायेण मुखेन गाधेः
सूनुं प्रबद्धाञ्जलिरेवमाह—

११

"मा मा वदत्येव मयि, प्रजानाम्
भवादृशानां विदुषां च वाग्भिः
यज्ञं ससङ्कल्पतया प्रवृत्तम्
बलेर्विरोधेन कथं विहंसि ?

१२

लक्ष्यस्य सिद्धौ अपि मध्य एव
[1]कर्मोपरोधे विहता श्रुतिः स्यात्,
सङ्कल्पनाशे मम सत्यमेयात्,
तोष्यश्च भूयो द्विगुणं प्ररुष्येत् !

१३

१ देवताभ्यो वा एष आवृश्च्यते, यो यक्ष्ये इत्युक्त्वा न यजते इति दोषश्रवणात् मध्येयज्ञं लक्ष्यप्राप्तौ सत्यामपि यथाविधि यथासङ्कल्पं च साङ्गस्य यज्ञस्य समापनीयत्वात् इति भावः ।

तत् नैव दोषाय जहामि यागम्,
वटुः पशूकृत्य हि याज्य एव
स्थितया निबद्धस्य मतं ममेदम्,
कामं भवान् रुष्यतु, मोदतां वा !"

१४

सत्यात् विभीतस्य नृपस्य वाचा
भूयोऽतिदीनं वटुकं समीक्ष्य
अदम्यसत्वो मुनिराह भूयः
प्रसान्त्वयन् अस्य समीपमेत्य--

१५

'मा गा वटो ! भीतिममेयशक्तिः
तपःप्रभावश्रितविप्रपङ्क्तिः
अन्यायतामिस्ररविः प्रचण्डः
स कौशिकः संप्रति ते पुरोऽस्ति !'

१६

स सोमयाजी ह्यपमृत्युमुक्त्यै
तस्मै व्यतारीत् वरुणस्य मन्त्रम्
यथाष्टमूर्तिर्भवबन्धमुक्त्यै
मुमूर्षवे यच्छति 'राममन्त्रम्

१७

आर्तस्य भावेन, हृदः स्वरेण,
निमील्य नेत्रे जपतोऽस्य मन्त्रम्
बालस्य तां भक्तिमवेक्ष्य हृष्टः
पाशी पुरः प्रादुरभूत् क्षणेन

१८

---

१. रामस्य अनादित्वात् अतिप्राचीनस्याऽपि राज्ञो हरिश्चन्द्रस्य कथायाम् तन्नामोल्लेखो नानौचित्यमावहति ।

प्रोचे स एवं वटुकं स्मितेन--
'मागा भयं वत्स ! दयामुखोऽसि
यागोऽस्तु पूर्णो वचसा ममैव,
भूयात् नृपालश्च रुजा विमुक्तः'

१९

बालोऽभयात्, पक्षजयात् मुनीन्द्रः,
वरात् नृपालः, प्रकृतिश्च भव्यात्
सर्वे प्रसेदुस्तमसा विमुक्ताः
प्रत्यूषदीप्त्येव हि पाशि-वाचा !

२०

ततो व्यवस्थाचतुरैः स्वचारैः
अपायशून्ये समये सुभव्ये
आनीतमात्मीयसुतं नृपालो
बहिर्गतं जीवमिवाऽध्यगच्छत्

२१

स्नेहस्नुता सा महिषी च नष्ट-
लब्धार्भका गौरिव शान्तिपूर्णा
हर्षाश्रुपूरैः स्नपयन्त्यजस्रम्
जघ्रौ स्वपुत्रस्य शिरो, मुखं च

२२

'कुमार आयात्, हृदयं समायात् !
देवोऽनुकूलः, फलिता स्पृहेति'
कोलाहलो हर्षमयो जनानाम्
सौधातिगो व्योमतले मुमूर्च्छे

२३

तदा सदारेण महीश्वरेण
शुभ्रा दिशः, शान्तिमयः समीरः,
स्वच्छं मनः, शर्ममयी तनूश्च
दुर्दैवहासात् इव सर्वमाप्तम्

२४

गाधेः सुतं प्राह नृपो विनम्रम्––
'मुनेऽर्पयेयम् मखदक्षिणां काम् !
अक्लेशयं स्वार्थकृते भवन्तम्,
यत् काम्यते तद् व्रियताम्, ददामि'

२५

अनादृतम्मन्य उदग्रसत्त्वः
सत्यं बुभुत्सुश्च स आह भूपम्––
'याचे किमन्यत् ? नृप ! वस्तुजातम्
राज्यं ससर्वस्वमिदं प्रयच्छ !'

२६

श्रुत्वा गिरं तस्य समीपवर्गः
दध्यौ सशोकं च सविस्मयं च––
'विक्षिप्तचित्तोऽस्ति किमेष यत्–तत्
अयाच्यमप्यर्थयते बुधोऽपि !'

२७

परं ससत्यो नृपतिस्तथेति
मुनेः परीक्षाकृतकौतुकस्य
पदद्वये राज्य-धने स्वकीये
समार्पयत् सत्यधृती प्रदर्श्य

२८

स्वयं तु राजेन्दुरनन्यदीप्ति-
रेवाऽभवत् राज्यकलाक्षयेऽपि
परं पुरावत् प्रकृतिं समस्ताम्
स्वस्य त्विषाऽऽच्छादयितुं न शेके

२९

गमिष्यतः शोकनिशाम् प्रगाढाम्
साकेतलोकस्य [१]विधेर्हतस्य
शनैः शुभालोकमपाहरन्ती
सद्योऽभवत् सा घटनैव सन्ध्या

३०

प्रतिग्रहात् अर्जितशासनोऽसौ
मुनिर्नृपं प्राह वशंवदं तम्--
'किं दक्षिणां स्वर्णमयीम् अदत्वा
पूर्णं भवेत् दानमिदं नृपाल !'

३१

ततो नृपालस्य ललाटभूमिः
स्विन्ना, मुखं प्राप विवर्णभावम्,
ययौ प्रशोषं रसना, क्षणं तु
रुद्धं गले वाक्यमपि प्रसह्य

३२

भूयोऽपि तं प्राह मुनिः सदर्पम्--
'किं मौनमुद्रां श्रयसे शिलावत् ?
मैवं विलम्बस्व नृप ! प्रयच्छ
मद्दक्षिणां, वा त्यज सत्यमेव'

३३

---

१ सामान्ये षष्ठी ।

'अहो ! कुतोऽयं कुलिशप्रहारः !
इत्यश्रु मुञ्चत्यवरोध-वर्गे
राजाऽपराधीव विनम्रमूर्धा
कृताञ्जलिः कौशिकमेवमूचे--

३४

'सत्यं जिहासुर्न भजामि मौनम्
भजाम्यहं प्रत्युत रक्षितुं तत्
मा याहि रोषं चरण-प्रपन्ने,
निर्यातयिष्याम्यचिरेण देयम्

३५

एकं हि सत्यं मम शिष्टमस्ति,
धनं तदन्यत् भवते वितीर्णम्
वेत्स्येव, मर्मज्ञ ! कियन्त्यहानि
दयस्व दीनं द्रविणार्जनाय

३६

देहोऽस्ति रिक्तो मम केवलोऽसौ,
तथैव भार्यातनयौ च निघ्नौ
मुने ! तदन्यं तु कथं कुतो वा
शक्नोमि सद्यो वितरीतुमर्थम् !

३७

काशीं यियासामि मुनीन्द्र ! पूर्वम्
संकल्प्य ते प्रत्तचरे प्रदेशे
पापाय किं पूज्य ! वसानि ?, सा तु
शैवी पुरी सर्वसमा श्रुता मे

३८

गत्वा मुने ! तत्र विभोः शिवस्य .
देव्याश्च तस्याः सुरनिर्झरिण्याः
सम्पर्कसौभाग्यमुपेष्यतो मे
सत्य-व्रतं किं नु न रक्षितं स्यात् !

३६

इति सप्तमः सर्गः

अष्टमः सर्गः

अथ भूपतिरेष सात्मजः
सकलत्रो निरगात् स्वहर्म्यतः
अवरोध-जनस्य साश्रुभिः
करुणैः क्रन्दित-निःस्वनैः सह

१

अधिकृत्य विधिक्रमोज्झितम्
निजसौधं विनिवर्तितेक्षणः
असकृत् नृपतिर्व्यलोकयत्
दयितं जीव इव स्वविग्रहम्

२

दयितान् स्वजनान् विलोकयन्
अपि साश्रून् पुरतः स भूपतिः
करुणाविजितः शशाक नो
लपितुं रुद्धरवो गलेऽश्रुभिः

३

कथमप्यवलम्ब्य धीरताम्
अवदत् साञ्जलिरेण कौशिकम्--
"अथ पुण्यनिधे ! मम प्रिया
प्रकृतिर्वत्स्यति ते समाश्रये

४

ऋजुदृष्टिरियं स्वभावतः
परिवृत्ते सहसा नियामके
नय- नव्यपथात् क्वचित् च्युता
नितरामर्हति रथ्यवत् क्षमाम्

५

न मनागपि दुःखिता सती
स्मरतात्, दूषयताच्च मामियम्
परशापशिलां गले दधत्
न तरिष्यामि भवाब्धिमन्यथा

६

दिनकृत्कुलजैर्नृपैः सदा
सुतवत् लालितपोषिता प्रजा
पुनरप्यवलोक्यतां त्वया
सुतदृष्टचैव न तु प्रजादृशा

७

प्रविवत्सुरिवाऽत्मसन्ततिम्
दयितां स्नेहमयीं स्वकां प्रजाम्
सदये त्वयि निक्षिपाम्यहम्
इयमात्मीयतयैव रक्ष्यताम्"

८

इति सप्रणयं वदन् असौ
हृदि केनाऽपि शितेन शङ्कुना
अभिविद्ध इव श्वसन् मुहु-
र्विरतो मध्यत एव सव्यथः

९

'विफलं गतशासनं वचः'
इति पर्यन्तभुवः स्वसद्मनः
चलितोऽभिददर्श स प्रजाम्
अवरुध्यैव पथः पुरः स्थिताम्

१०

नृपतेः, प्रकृतेश्च सङ्गमो-
ऽसृजदेतां करुणां स्थितिम्- 'मिथः
अवरोधमितं गले वचो,
विततं चाऽश्रुमयं विलोकनम्'

११

प्रकृतिः क्षणमौनमुद्रया
प्रतिबोध्येव सुषुप्तधृष्टताम्
दयितेव निजं प्रियं नृपम्
समवोचत् प्रविवत्सुमुत्स्वरा--

१२

'चरणप्रणतान् विहाय नो
न भवान् संप्रति गन्तुमर्हति
हृदयी दयितान् स्वमाश्रितान्
न कदाचित् विरहय्य गच्छति

१३

त्वयि गच्छति नाथ ! वञ्चितान्
ननु कोऽस्मान् विपदोऽभिरक्षति ?
स्खलितान्यपि कश्च मृष्यति ?
सुतवत् स्निह्यति ? तात ! पुष्यति ?

१४

ननु केयमपूर्वपद्धतिः
चरणैः धर्ममयैः उपाश्रिता
यत एवमनाथिता मही,
प्रकृतिश्चाऽपि शुचाऽऽकुलीकृता !

१५

कथमेकऋषेर्विशोषयेत्
हसितं लक्षजनाश्रुसंहृतिम्
कतरत् ननु शास्ति कौशिकः
सुदृढं नो हृदयं, तनूम् उत ?

१६

यदि न प्रतिपद्यसे वचः
प्रणतानां नृप ! नः सुचेतसाम्
वयमप्यभयाः अवाप्नुमो
वदितुं, सत्ययुगं हि साम्प्रतम् !'

१७

'बहु वान्तमितो विरम्यताम्'
इति सामर्षतयैव कौशिके
वदति, प्रकृतिः सजागरा
समवोचत् दहतीव तं रुषा--

१८

"त्वमितो विषयो न नो गिराम्,
नच लभ्योऽत्र पुनः प्रतिग्रहः
किमकाण्डगिरा ? पलाय्यताम्
त्वरितं, माऽस्तु दशा तवाऽहिता !

१६

भसितैर्मुनिवेषमादधत्
त्वमशान्त्यै यतसे जगद्वने
छदनैस्तरुवेषमादधत्
मृगजीवीव दुराशयं वहन्

२०

असकृत् जगतः प्रतारणात्
परिपक्वां मधुपिङ्गलाम् तताम्
अशमः शिरसैव केवलम्
वह मायाव्रतिं जटामिमाम्

२१

न तनौ तव तापसं महः
श्रयते विश्वहितैषि शीतलम्
प्रदहन् खलु विश्व-काननम्
ज्वलति प्रौढशिखास्मयोऽनलः

२२

तपसाऽनिलपर्णवृत्तिना,
वनवातैः, शिशिरैश्च चन्दनैः
अपि युक्तवपुर्निसर्गतः
फणिवत् क्रोध-हलां वमन्नसि

२३

मुनियक्ष ! तृषाऽस्ति चेत् तव
पिब नः शोणितमेव, जायताम्
तव तन्त्रमिदं च शासनम्
परमस्मान् न जहाति नो नृपः"

२४

अथ मध्यत एव भूमिपः
प्रतिषिध्योद्धतभाषिणीं प्रजाम्
अवदत्— "धृतिमेत्य भो ! क्षणम्
मम सत्यं वचनं निशम्यताम्

२५

विदुषा स्थिरभूतिमिच्छता
न विनिन्द्याः परमात्मभूतयः
सकला अपि मर्त्यबन्धवः,
किमुत ज्ञानधनास्तपस्विनः !

२६

जगतः कुत आगता वयम्
कुत एतव्यमितोऽन्ततश्च नः,
क्षणभङ्गुर-विश्वमन्दिरे
सहवासोऽत्र भवेत् कियत्क्षणः ?

२७

न पुरा कलहो नचाऽन्ततः
किमु मध्ये लघवे क्षणाय सः
क्रियते ? हसतैव वासराः
अतिवाह्या, हसतश्च पश्यता !

२८

त्रिदिवे द्युषदां यथाऽमृतम्
इह लोकेऽपि मिथः सबन्धुषु
प्रणयामृतमस्ति निर्मलम्
नय तेनैव दिनानि निर्वृतः

२९

जगतः परिणामहेतवो
ह्यतिमर्त्या मुनयो विधेर्भुजाः
उपरि प्रभवन्ति नः सदा,
तदिमान् भावय देवभावतः

३०

प्रकृतेर्नियमेन जातुचित्
विरहे भाविनि निश्चितं मम
विधिना सहसाऽद्य कल्पितः,
सहनीयः स सुधीरचेतसा

३१

तदलं रुदितेन गच्छत
स्वगृहान्, भावनया विशालया
ऋतमत्यजता च कर्मणा
प्रयतध्वं जगतोऽस्य शर्मणे

३२

विजहीत सृतिं, हितं तु वः
सततं दूरगतोऽपि चिन्तये
सकलैः क्षमणीयमेव मे
कृतमुच्चावचमस्ति चेत् क्वचित्

३३

सुकृतं यदि वा क्रियत् भवेत्
भवतां सेवनलालसा-तृषम्
अपनेतुमयं पुनर्जनिम्
अधिसाकेततटे ग्रहीष्यति

३४

विमलं मयि हार्दमस्ति चेत्
हसितेनैव मुखेन तिष्ठत
रुदितान् व उपेक्ष्य गच्छतो
मम किं वर्त्मनि मङ्गलं भवेत् ?

३५

जननं, मरणं, प्रियस्य वा
विरहः शल्यमयो न चेत् भवेत्
बहु किं त्रिदिवेऽपि वा क्षितेः ?
यत एतां सुकृती जिहासति !

३६

दयिता मम हे हयाः ! गजाः !
विहगाः ! हे सवृषाश्च धेनवः !
वसत, व्रजितोऽस्म्यहं, विधिः
सकलान् क्षेमवतः करोतु वः"

३७

इति भूपतिना प्रबोधिता
प्रकृतिः क्लिन्नतनुर्दृगम्बुभिः
उषसि व्यसृजत् प्रियं मधुम्
तुहिनैः आर्द्रतनुर्लतेव तम्

३८

अवनीतलमुत्खनन्निव
दृढमुत्क्षिप्य दिवं नयन्निव
पथि धूलिभिरन्धयन्निव
पथिकानां भयचञ्चला दृशः

३९

कथयन्निव हृद्विदारिणीं
करुणां भूपकथां दिवौकसः
नृपवर्त्मनि वात उद्ववौ
सहसाऽऽवर्तमयो भयावहः

४०

तरसा गलदाम वंतसम्
अपि संत्रोट्य, विलङ्घ्य गोष्ठकम्
फणिभोगवदेव लम्बितम्
चलमुन्नीय च पुच्छनालकम्

४१

दशदिक्षु शुचाऽश्रुसङ्कुले
भयलोले करुणे दृशौ वहन्
त्वरयाऽऽगमदुत्पतन् नृप–
मनु 'हुंभे' ति नदन् गवां गणः

४२

गतवत्यथ देवतल्लजे
किमु शून्यैः पुरमन्दिरैः ? इति
कुपिता इव शोणदृष्टयो
वृषभा उत्ककुदः सफूत्कृति

४३

मद 'होंक्'कृतिभीषणा महीम्
भृशमुद्धत्य खुरावघर्षणैः
निशितैः असकृत् व्यदारयन्
स्वविषाणैः पुरमन्दिराण्यपि

४४

तुरगा अपि भग्नमन्दुराः
व्यथयन्तः कटुहेषया श्रुतीः
अयताश्चलकेसराः जनान्
पुर उन्मार्गगतैः अधक्कयन्

४५

उपसौधमवस्थितस्तदा
न कपोतः सविधे स्थिताम् प्रियाम्
परिचुम्बति, नाऽपि सन्निधौ
क्षुधितौ स्वौ पृथुकौ च पश्यति !

४६

विमना इव पक्षतिद्वयम्
अभिसङ्कोच्य, निमील्य लोचने
मलिनो विरहग्रहात् इव
व्यथितस्तिष्ठति शोकमुद्रया

४७

नाऽकर्ण्यते प्राक् इव सौधभूमौ
प्रभात-गीतं श्रुतिहारि, शोकात्
सुप्तानि वाद्यानि हि मागधानाम्
हस्तेषु, वाद्येषु च गीतशब्दाः

४८

न वा प्रबुध्याऽपि सुवर्णरश्मेः
सङ्गात् विहङ्गा उपसौधभूमौ
पुरेव धान्यादिकणान् चरन्ति,
क्रीडन्ति, नृत्यन्ति, कलं रुवन्ति !

४९

इत्यष्टमः सर्गः

नवमः सर्गः

पूर्वं मृदूभूय यथाक्रमेद्धम्
तापं दिशन् दुःसहमुग्ररश्मिः
कुशासनो भूप इवाऽतितिग्मैः
करैर्विहस्यैव जगत् बबाधे

१

याते मधौ भर्तरि कानन-श्रीः
शृङगारपुष्पाणि लतालकेभ्यः
उत्क्षिप्य मम्लौ विरहार्क-तप्ता
गूढव्यथा प्रोषितभर्तृकेव

२

याते कलातत्त्वबुधे वसन्ते
न कोकिलः कूजति मञ्जु मञ्जु
को वा कविर्भावरसाऽनभिज्ञम्
ग्रीष्मं नरं श्रावयति स्वगीतम् !

३

'यो नो जनिं स्वर्णमये प्रभाते
ददौ, मधुः स क्व गतोऽधुनेति'
वृद्ध्वाऽपि चूतादिफलानि जग्मुः
क्रमेण शोकात् इव पीतभावम्

४

ग्रामे, पुरे, वर्त्मनि कानने च
सर्वंसहाऽन्तःसरसाऽपि देहम्
निष्क्रान्तिकं मृद्विभवं बभार
साध्वी समौना निकृता प्रजेव

५

सजीवता यस्य चले जलेऽभूत्
आकर्षणं पङ्कजसौरभे च
निरात्म तत् क्षामरसं सरोऽद्य
शोच्याम् अशोभां शववत् बिभर्ति

६

परार्थवृत्ताः शुचयश्च नद्यो
नदाश्च नूनं जगतोऽस्य शान्त्यै
संशोष्य पानीयमयं स्वदेहम्
मासद्वयं शश्वतपश्चरन्ति

७

भूत्वा कणाः, सौरकरैश्च युद्ध्वा,
स्वयं विशुष्याऽपि तदुग्रतापात्
रक्षन्ति ते सृष्टिमहो महत्त्वम्
महात्मनां देहभृतां परार्थे !

८

भूमिश्च तप्ता हरितश्च तप्ताः
अन्तर्बहिस्तत् सममेव तप्तम् !
ग्रीष्मे जना वर्त्मनि घर्मतप्ते
निरङकुशं राजनयं स्मरन्ति !

९

तदा स्वगेहात् अनुकूलतल्पात्
को निःसरेत् धान्यधनैः प्रपूर्णः
श्राम्यन्ति घर्मेऽपि बहिस्त एव
ये निश्छलाः शक्तिहताश्च सन्ति

१०

शीतोपचारैः व्यजनैश्च कश्चित्
संसेवितो हर्म्यतले समास्ते
कश्चित् तदेव श्रमवारिधौतः
क्षेत्रं खनत्यर्ककराभितप्तः

११

कश्चित् लतावेश्मनि कामिनीभिः
छायामये क्रीडति शीतशीते
कश्चित्तु भारेण विनम्रमूर्धा
तप्ते पथि स्विन्नतनुः प्रयाति

१२

ग्रीष्मस्य राज्यस्य विशिष्टतेयम्——
'भुङ्क्ष्वाऽल्पमात्रं, वस नग्नदेहः,
संश्लिष्य नो ब्रूहि न तिष्ठ मित्रैः,
ग्लानः सदा निर्विश शोषणं च !'

१३

ग्रीष्मे महीं शासति सागरान्ताम्
स्वभावशीते अपि वायुनीरे
प्रेष्ठं स्वधर्मं जहतुर्भविष्णुः
को नाऽनुवर्तेत निदेशहस्तम् ?

१४

तदा फणी प्राणिपदाहतोऽपि
भीमां फणां नोन्नयते, मृगेन्द्रः
दृशौ नवोदञ्चति, रूक्षनीतिः
तेजस्विनोऽप्यात्मबलं छिनत्ति

१५

स चातको व्योमतले यथेच्छम्
उड्डीयते देववदेव, तं च
कदर्थयन्त्यस्ति तृषैव काऽपि
च्छायेव भूतस्य महोष्णसत्ता !

१६

एवं परैः क्लेशितपीडितोऽपि
प्राणान् जिहासुर्न महाव्रतं स्वम्
उद्दीप्त-सत्याग्रह-पुण्यभावो
हे चातक ! त्वं सुचिरं प्रजीव

१७

मा गाः शुचं चातक ! ते सहायो
व्रताय कश्चित् चरति स्थलेऽपि
सत्याय यो राज्य-सुखानि हित्वा
नग्नः, श्वसन् ग्रीष्मपथे प्रयाति

१८

चण्डातपं योऽविगणय्य कश्चित्
अकिञ्चनो दीन इवाऽद्य काशीम्
पद्भ्यां व्रजन् अस्ति, स सार्वभौमः
साक्षात् अयोध्यारविरेव याति !

१९

तं नाऽद्य सामन्तगणोऽनुयाति
न चामरे बीजयतः पुरेव
छत्रं न वा चन्द्रिकयेव धौतम्
छायाम् अजस्रं शिशिरां ददाति

२०

तथापि नैतस्य महीक्षितोऽस्ति
काचित् मुखे संप्रति दैन्य-रेखा
चकास्ति हि प्रत्युत रूपवत्याः
महात्मताया इव दीप्तिलेखा !

२१

अग्रे नृपः, सा महिषी च पश्चात्,
पुत्रः कदाचित् पितुरेव पार्श्वे,
कदा च मातुः स जगाम पार्श्वे
एवं ययुर्ग्रामपथे त्रयस्ते

२२

विकस्वरं भूमिपतेर्मुखं तत्
प्रायो विषण्णं मलिनं महिष्याः,
सोत्कण्ठमन्यस्य च, तत् त्रयं हि
भावत्रयस्यैव निदर्शभूतम् !

२३

क्वचित् क्षुधार्तान्, अविदृष्टपूर्वान्
एतान् मिलित्वा व्रजतो विलोक्य
ग्रामीणनार्यो गृहतोऽध्वपार्श्वम्
समेत्य पश्यन्ति मिथो लपन्त्यः

२४

'किञ्चित् कृशा भद्रमुखा इमे के ?
कुतो गमिष्यन्ति ? कुतः समेताः?'
एवं बुभुत्साकुलिता अपीमाः
प्रष्टुं क्षमन्ते न च मुग्धभावात्

२५

तासां ततः काऽपि पटोलपूर्णम्
किलिञ्जकं शीर्षतले दधाना
वर्षीयसी दुग्धकचा नृपालम्
पप्रच्छ– 'कस्त्वं क्व गमिष्यसी' ति

२६

'साकेतभूमिर्मम मातृभूमिः
क्षत्रोऽस्मि कृत्या रविवंशजातः
पत्न्याऽनयाऽनेन सुतेन चाऽपि
वाराणसीं याम्यधुना तु मातः !'

२७

साकेतनाम्ना स्मृतभूपतिः सा
पप्रच्छ भूयोऽपरिचित्य भूपम्––
''भो पान्थ ! कच्चित् कुशली महिष्या
समं स नो भाग्यरविर्नृपालः ?

२८

ईषत् विलम्ब्यैव हि वारिवाहे
वृष्टेऽपि कारुण्यपरः परारि
गृहीतवान् यः करमर्धमेव
मर्त्यं गतः कोऽपि स देव एव !

२९

दुर्भाग्यतो यद्यपि तं नृपालम्
नो दृष्टवत्यस्मि, तथाऽपि तस्य
जानामि वात्सल्यमतश्चिराय
जीव्यात् स मे श्वेतकचाशिषैव !

३०

तथाऽतिकष्टेन चिरेण लब्धः
स राजपुत्रो ननु कीदृशः स्यात् ?
यो जन्मना नोऽप्यहरत् विषादम्
पित्रोः कियत् सोऽद्य मनो हरेत !

३१

शृणोमि राज्ञो विषये बहूनाम्
ग्रामेष्वसंभाव्यकथाः चलन्ति
किन्त्वीदृशं देवहृदं निरस्य
देवोऽपि कं राजपदे नियुङ्क्ते ?"

३२

प्रोचे नृपः— 'स्यात् कुशली स नूनम्
तोष्टूयते यं भवती हृदैवम्
विलीयतां, नश्यतु तस्य कामम्
विनश्वरं राज्यकलेवरादि !'

३३

इत्येव संलप्य जगाम वृद्धा
राजाऽपि तस्या वचनेन भूयः
उद्बोधितस्नेह इव प्रजासु
जग्राह वाष्पाकुलितः स्वमार्गम्

३४

स्नेहो हि सर्गस्य मृदुर्बलीयान्
निरक्षरः कोऽप्यभिचारमन्त्रः
विचाल्यते येन महात्मनोऽपि
सङ्कल्पधीरोऽपि विशाल आत्मा !

३५

ग्रामोऽस्तु मार्गोऽस्तु तथा प्रपाऽस्तु
सर्वत्र लोकस्य शुचाऽऽतुरस्य
सैवाऽस्ति चर्चा– 'नृपतिः क्व यातः ?
आसीत् स तु न्यायदयावतारः !'

३६

नृपो ययौ स्वाध्वनि सर्वमेवम्
शृण्वन्, स्वपत्न्या निभृतं लपन् च
'शोचन्तु नो मां परिचित्य लोकाः'—
एवंविचारः पथिकैः अलक्ष्यः

३७

जातु श्रमेण, क्षुधया च कामम्
सन्तप्तयोः पुत्रकलत्रयोः सः
'ग्रामोऽस्ति कुत्रे' ति वचोऽतिदीनम्
आकर्ण्य संभ्रान्ततया जगाम

३८

क्वचिच्च तौ ग्लानपदौ विबोध्य
ग्रामाशयाऽग्रे चलितोऽपि सायम्
सुपक्वगोधूममयीम् अशालाम्
प्रापत् समां क्षेत्रततिं स भूयः

३९

न तत्र वासादि नृपो ददर्श,
ददर्श तं केवलमन्धकारम्
गोधूमपीतां भुवमप्यपारे
कालिम्नि मन्दं परिवर्तयन्तम्

४०

अज्ञातपूर्वा सरणी, प्रगाढं
ध्वान्तं, क्षुधार्तौ च कलत्रपुत्रौ
भूपः स किं हन्त ! तदा करोतु ?
विलक्षितो वर्त्मनि मौनमास

४१

तथादशं वीक्ष्य नृपं तडिच्च
मूर्तेव तद्दुर्नियतिः प्रहृष्टा
कादम्बिनीसन्तमसे निलीना
स्मेरं वितेने मुहुरुद्भवन्ती

४२

विद्युत्प्रकाशेन ततोऽल्पदूरे
च्छायाविशालं स समीक्ष्य वृक्षम्
देवीं मुहुर्निःश्वसतीमवोचत्
पुरोपभोगान् असकृत् स्मरन्तीम्—

४३

"शीतोऽनिलो वाति, चकास्ति पीता
विद्युच्च, तस्मादचिरेण नूनम्
वृष्टिर्भवेत् प्रेयसि ! तत्र याम
शाखामयश्छत्रसमोऽस्ति वृक्षः"

४४

एतादृशान् दैवहतान् अनाथान्
को नाम रक्षेत् त्वदृते पृथिव्याम् ?
छायाऽस्ति ते संपदनन्यतुल्या,
संरक्ष तत् वृक्षपते ! त्वमेतान्

४५

लब्धाऽसि भो ! निःस्पृहसेवयैवम्
तरो ! पुनर्जन्मनि जन्मनि त्वम्
आकर्षणं स्वान्तहरं प्रशान्तम्,
असीमितम् शीतलमुन्नयं च

४६

मुहुर्मुहुर्वृष्टिरभूत् वराको
वृक्षः कियत् रक्षतु तान् विपन्नान्
झञ्झानिलं, जातु च वारिधाराः
सोढ्वैव तेषां रजनी प्रयाता !

४७

आश्वासयन् ग्लानपदां स्वकान्ताम्
विपन्मयीभिर्महतां कथाभिः
दिवाकरे पश्यति पूर्वशैलात्
भूपः स जग्राह पुनः स्वमार्गम्

४८

उल्लङ्घ्य नीतिं समयस्य, रात्रौ
आक्रान्तवन्तं खलु [1]वर्षशत्रुम्
अशक्नुवन् सोढुमयं निदाघो
जज्वाल तीव्रोऽन्यदिने रुषेव !

४९

कुर्वन्ति युद्धं प्रकृतेर्विभिन्नाः
मिथः सदर्पा बलवत्प्रकोपाः
परन्तु किं तर्हि बलीयसां स्यात् ?
फलं तु तेष्वेव विधेर्हतेषु !

५०

तप्तेषु केदारपथेषु तेषाम्
घर्मेण तालु क्वथितं, क्षुधा च
अन्त्राणि दग्धानि, पिपासया च
शुष्को गलो हन्त ! कथं सहेरन् !

५१

एकेन सत्यं व्यपदिश्य राज्यम्
गृहीतमन्यस्य तथा विपत्तिः !
न वेद्मि मर्त्यम् कृतदुर्विपाकः
क्लिश्नाति किं वा परविप्रलम्भः !

५२

नियन्त्रितोऽध्यात्मविचारतन्त्रे,
सत्येन दासीकृत एष राजा
कष्टानि कामं सहताम् स्वबुद्ध्या
देवी कथं हन्त ! मुधा सहेत ?

५३

१. वर्षशत्रुम् वृष्टिपरिपन्थिनम् । वृष्टिर्वर्षमित्यमरात् ।

स्व–मातृजातेर्यशसे, गरिम्णे,
भूत्यै च देशस्य, कुलस्य चाऽपि
अग्नौ, समुद्रे, प्रमदप्रपूर्णे
सौधे च पत्यैव सहाऽविशन्ती–

५४

स्थित्यै च तं स्वात्मतया श्रयन्ती,
स्वतन्त्रतां हालहलं स्मरन्ती,
मर्यादया निर्मितभूषितेव
धन्याऽतिधन्या खलु हिन्दुनारी !

५५

इति नवमः सर्गः

दशमः सर्गः

आत्मानं नो विषयतपनोष्णातपैस्तापयध्वम्
लोकाः ! आगच्छत मधुमयीम् शीतलाम् उत्तराशाम्
एवं सङ्केतनपर उदक्प्रस्थितः शान्तिधीरः
'कल्कल् कल्कल्' स्वनति मधुरं जाह्नवीयो जलौघः

१

प्रातः प्राच्या उदय-कनकद्वारमुद्घाट्य देवी
स्वा स्वर्णोषा किरणपथतो मन्दगत्याऽवतीर्य
स्नातुं गाङ्गं सलिलमविशत्, तत्स्मितं व्याप तोयम्
केशाश्चाऽस्याः कनकरुचिरा वीचिदृश्या अनृत्यन्

२

तीरोद्यानात् 'सिरिरि' ति वहन् शीतलश्चूतवातः
सुप्ता वीचीस्त्रिदिवसरितोऽबोधयत् पूर्गृहांश्च
देशं, कालं, स्थितिमनुसरन् वर्तते चेत् सुमन्त्रः
एकोऽप्यात्मा भवति जगतः संप्रबोधे हि शक्तः

३

सौम्ये स्वर्णोषसि, मृदुतरे मारुते स्वर्झरिण्याः
भुग्ना भुग्नास्तरलतरलाः स्वर्णवीचीर्विलोक्य
हैमा नागाः कुत इति परं विस्मिताः पक्षिणोऽपि
गङ्गातोयोपरि कलरवा मन्थरा उत्पतन्ति

४

प्राचीहर्म्यात् बहिरुपगतो भानुरेतां तु दिव्याम्
गङ्गां दृष्ट्वाऽधिमहि पतितां भावयित्वेव पूर्वम्
रुष्टो रक्तः समजनि, पुनर्भूपतेः सागरस्य
संस्मृत्येवाऽमरशुभकथां स प्रहृष्टः, सितश्च

५

स्वर्गस्थेयं सततमतलस्पर्शनीया महत्त्वैः
भूमौ प्राप्ताऽऽहृतपरमला कीदृशी स्यादितीव
तत्वं प्रेप्सुर्दिनमणिरसौ गोलबिम्बात्मना नो
मोघायासोऽप्यनुदिनमिमाम् आप्रदोषं जहाति !

६

कालं कालं निविडतमसो विश्वमाहो ! क्व लुप्तम्
दीप्तं दीप्तं कनकरुचिरं विश्वमेतत् कुतश्च !
इत्याश्चर्यैः उदितपुलकाः तत्र नक्राः प्रभाते
घप्घप्कारं बहु सलिलमुच्छालयन्तश्चलन्ति

७

तत्र स्वैरं हृदभिलषितः शीतलो वास, एवम्
स्वर्णं दृश्यम्, पुनरमरवत् निर्निमेषा च दृष्टिः
ते ते मीना अपि दिविषदां लेभिरे स्थानसौख्यम्
सूते किं किं न खलु महतामाश्रयः श्रेय इष्टम् !

८

अज्ञैः प्राज्ञैः धनिभिरधनैः अन्त्यजैर्ब्राह्मणैश्च
भक्त्या दत्तं तृणमपि लघु स्वर्णदी श्रद्दधाना
हृष्टाऽऽदत्ते झषवलयितैः उद्यतैर्वीचिहस्तैः
'भक्त्यामेव प्रणयिहृदया देवता, नेतरत्र !

९

दुष्टान् कीटान्, कलुषमपि निर्मूल्य सर्वोपकारे
संलग्नां तां मृदुलहृदयां स्वर्णदीं श्रद्दधाना
आर्या म्लेच्छा अपि समतया संश्रयन्त्येव नित्यम्
'कां जातिं नो निजयति गुणः साधुरन्योपकारः !'

१०

निःस्वार्थोऽन्योपकृतिविभवोऽवश्यकर्तव्यबुद्ध्या
कार्यं कुर्वन्नपि न 'कुहके मज्जतीतीव मौनम्
शंसन्त्यस्ता जलमृदुपथैः अर्धकूष्माण्डरूपा
नावस्तूर्णा अमितपथिकान् धारयन्त्यश्चलन्ति !

११

चित्रन्त्वेवं सुकृतिमहिते शान्तिपूर्णे स्थलेऽपि
दूरे मध्येसलिलमहरन् बालमत्स्यान् वकास्ते
ज्ञानं प्रापुर्नच कथमिमे स्वर्धुनीस्वच्छयोगात्
स्यात् वा तीर्थं विमलमसतां नैव वृत्तिस्तु तत्र !

१२

स्यादेवाऽत्राऽप्यबलबलिनोर्गाढभेदान्धकारः
स्यादेवाऽत्राऽप्यधनधनिनोस्तिग्मभेदाऽतपश्च
केयं ? काऽन्या सरिदमृतदं वेत्ति कोऽस्या निनादम्
स्नायादज्ञो जन इह वपुःक्लेदमात्राय कामम् !

१३

१. कुहके बन्धकारणे मायाप्रपञ्चे । धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहीति भागवतादौ प्रयोगात् ।

मातुः पृथ्व्याः हरितमृदुले शान्त उत्सङ्गहर्म्ये
तस्याः कामप्रसविनि मुहुर्मृत्स्वरूपे निधौ च
कस्य प्रेमा न भवति, तथा कस्य वा नाऽधिकारः
किं दृश्यन्ते ? सततरुदिता याचमानास्ततेऽत्र !

१४

एको भानुस्तपति, जठरे वह्निरन्यः क्षुधार्तः
ताभ्यां क्रूरः परिभवमयः सर्वतः सोऽनलश्च
नो वासो, नो शरणमपि हा ! कान्तिचैतन्यशून्याः
यातप्राणा इव शवगणास्तत्र मूर्च्छन्ति दीनाः !

१५

चुम्बित्वा तान् उपमुखगता मक्षिकाः संलपन्ति
रोगाः सालिङ्गनमविरलं गाढसख्यं चरन्ति
हृद् विध्यन्ती धनिजनघृणाऽक्षय्यसंपत्तिरस्ति !
तस्मात्तृप्तास्तनुमसमये मृत्यवे तेऽर्पयन्ति !

१६

प्रत्यासन्नो रिपुरिव तदा पूर्णिमावासरोऽस्ति[1]
श्रान्त्वाऽऽनीतं तटभुवि कियत् भोज्यमासन्नमस्ति
तस्याऽदूरे सरसरसना वानरा उत्प्लवन्ते
आस्ते राजा मलिनवसनस्तत्र भार्यासुताभ्याम्

१७

ते ते दीनाः पुर उपगताः क्षुत्कथां वर्णयन्ति
राजा तादृक् सदय उदरे किं पतेदस्य भोज्यम् ?
सर्वं दुःखं करुणहृदया दुर्भगास्ते लभन्ते
क्लिश्यन्ते ये सततमपरान् दुःखतप्तान् विलोक्य !

१८

---

१. पूर्णिमावासरः पूर्णिमादिनम् । क्लीबे दिवसवासरौ इत्यमरः ।

सर्वस्वेऽपि व्रजति नितरां वज्रसारः स दैन्य–
तप्तान् दृष्ट्वा द्रवति घृतवत् कारणं स्यात् किमत्र ?
व्यक्तित्वं वा भवति महतास् ईदृशं यत् पयोदो
वज्रात्माऽपि द्रवति धरणौ ग्रीष्मतप्तान् विलोक्य

१९

अग्रे कश्चित् व्रजतु विपदं संपदं वाऽथ मृत्युम्
आस्थाशून्या हृदयरहिता सैव कल्पान्तनिष्ठा !
एवङ्कारं सततमजरं पूर्णसौभाग्यमाप्तुम्
भो पाषाणाः ! क्व रहसि तपश्चीर्णमाहो भवद्भि : ?

२०

स्वर्गो मार्गं न दिशतु, लिखेत् नेतिहासः स्वनाम
व्यक्तित्वं स्वं तमसि निबिडे संप्रलीयेत कामम्
मन्येऽत्यन्तं परुषहृदया यूयमानन्दभाजः
ते वञ्च्यन्ते मृदुल-हृदयाः "[1]श्वो मयूरं" ब्रुवाणाः !

२१

आस्तां, एवं क्षुधिततृषिता अप्यमी कस्य हेतोः
यावच्छिष्टम् पुर उपगतं तत्र नाऽश्नन्ति भोज्यम् ?
'गुन्गुन्' कारं मिथ उपसृताः कर्णगं संलपन्ति
मध्ये मध्ये व्यथितविकलं दीर्घमुष्णं श्वसन्ति !

२२

दीना वाष्पाकुलितवदना धूसरा रूक्षकेशा
देवी भूमिं विलिखति नखैः अश्रुसिक्तैः अजस्रम्,
राजा निध्यायति, निमिषतः प्रायशो नाऽस्य नेत्रे,
दूरे दूरे क्षिपति चपले लोचने रोहितश्च

२३

१. वरमद्य कपोतः श्वो मयूरादिति न्यायेन परलोकफलमुपेक्ष्य इह स्वार्थमेव पूरयन्तो निष्ठुरा इत्यर्थः ।

अग्रे कालं किमपि सहसा भीतिदं रिङ्गतीव
धैर्यं प्रोज्झत्स्थितिविधि चलच्चित्रवत् प्रेङ्खतीव
सर्पं सर्पं हृदयमभितः शून्यताऽऽक्रामतीव
हन्तैतेषां समजनि तदा कल्प एकः क्षणोऽपि !

२४

आत्मा स्थायी रिपुरतिबलो, मानसं भीमरक्षः,
देहो भारो, विवृतवदना भावना क्रूरयक्षी,
कालो व्याघ्रः, प्रियसमुदया रत्नगर्भा श्मशानम्,
भोज्यं तिक्तं, नियतिनिहतः कुत्र शान्तिं लभेत ?

२५

शान्तं वातं विपरिणमयन् प्रोद्धताभिर्जटाभिः,
रुष्टाकृत्या सभयमुदितां मङ्गलाशां निरस्यन्,
रूक्षैरुच्चैः कटुपदरवैर्धैर्यसीमां विभिन्दन्
विश्वामित्रो नृपमुपययौ सार्धमेकद्विजेन

२६

पूर्वं धैर्यं तदनु नृपतिः, प्राक् भयं रोहितोऽन्ते,
पूर्वं चिन्ता तदनु महिषी स्वागतं तस्य चक्रुः
सोऽपि प्रश्नैः परुषवचनैः प्राक् ततः स्वात्मना च
जग्राहैषां विनयमहितं स्वागतं भक्तिधौतम्

२७

ज्ञात्वा क्रुद्धं तमृषिमनतिक्रम्यमालोच्य कालम्,
ध्यात्वाऽवस्थां प्रकृतिविचलत् साधु संयम्य धैर्यम्,
भृत्वा भाले स्थितिविषमताजन्मनः स्वेदबिन्दून्
सत्यप्राणो नृपतिरगतिः सस्मितं प्राह देवीम्—

२८

"वारं वारं पुरि गुरुमुखाऽऽकर्णिताभिः कथाभिः
जानास्येव क्षणसहसुखं जीवनं मानुषस्य
तस्मात् कान्ते ! विमलहृदया तिष्ठ, मा याहि शोकम्
सङ्गे पुत्रो भवति विधुवत् सौम्यवर्धिष्णुरेषः

२९

चिन्ता माऽभूत् त्वयि मम कृते, कालयोगात् ग्रहं तु
विक्रीय स्वं, त्वरितमृषये दक्षिणाम् अर्पयामि
कान्ते ! पश्चात् मम परवतः कुत्र गन्तव्यता स्यात्,
सत्यक्रोडे श्रमविमलया तिष्ठ वृत्या सवत्सा !

३०

स्निग्धं तत् स्वं किरणविमलं जीवनं दास्यपङ्के
निर्बन्धात् मा क्षिप विदुषि ! तत् स्वैरमेवं चकास्तु,
भानोर्वंशे समजनि सुतोऽप्येष जीवेत् अदैन्यम्,
यद्वा तद्वा भवतु विधिना वञ्चितोऽहं प्रयामि"

३१

सा प्राप्स्यन्ती समयविवशं तामसं घोरयोगम्
निर्वेक्ष्यन्ती प्रियविरहजां शोचनीयाम् अवस्थाम्
चिन्ताक्षीणद्युतिरतितरां वासरश्रीरिवेयम्
दूरे यान्तं नरपति-रविं वाष्पकण्ठैवमाह—

३२

'नाथे दास्यं श्रयति सहजा ह्यावयोर्दासता स्यात्,
दास्यां सत्यां मयि तु भवतोर्दासभावः कथं स्यात् ?
स्वल्पात् तुष्टे हि विधिहतके भूपते ! भूयसा किम् ?
तस्मात् आज्ञापयतु मुदिता यामि दास्येऽहमेव

३३

आज्ञां नो जात्वपि हि भवतोऽलङ्घ्यं प्राकृताऽपि
स्यां दुष्टैवाऽद्य तु नरपते ! नैव तां पालयामि
विक्रीणाना निजपतिमहो ! कीदृशी पापिनी स्याम्
नारीधर्मो जयति समये भर्तुराज्ञाम् अयुक्ताम्"

३४

दम्पत्योस्तत् करुणकरुणं वाक्यमश्रान्तदैन्यम्
विश्वामित्रश्चपलकुटिलं वीक्षमाणः शृणोति
शीर्षं धुन्वन्, कपिलपरुषाम् आमृशन् श्मश्रुपङ्क्तिम्
अन्यो विप्रो मुनिसहचरो मध्यतः प्राह भूपम्--

३५

'मूल्यं युक्तं भवतु, पुरतो ग्राहकोऽस्म्येव राजन् !
दासी याता मम निलयतो, देहि पत्नीं नयामि
किन्त्वेषा मे गृहपरिजनान् देववत् भावयेत,
शुश्रूषेताऽनिशमलसतां क्ष्वेडवत् वर्जयेच्च'

३६

'किन्त्वेषा मे गृहपरिजनान् देववत् भावयेत
शुश्रूषेताऽनिशमलसतां क्ष्वेडवत् वर्जयेच्च'
एतद् वाक्यं निकृतमनसाऽऽवर्तयन्, चिन्तयंश्च
राजा बद्धाञ्जलिरुपगतः सस्मितं प्राह विप्रम्--

३७

'भार्या त्वेषा कुसुममृदुला कालतो लब्धदुःखा
सेवाधर्मं परमविदुषी प्रस्खलेदेव जातु
सेवाभिज्ञः श्रमपरिचितः शक्तगात्रः पुरोऽहम्
वर्ते ब्रह्मन् ! ननु तव गृहे नास्ति मद्योग्यकर्म ?

३८

क्रीता चेयं यदि तव गृहे कर्मणे स्यात् नभूम्ने
तत् किं कुर्याः, विमृश पुरतः प्राप्य बुद्ध्या भविष्यम्[1]
पूर्णेच्छा मे भवतु, तव चाऽर्थस्य साफल्यमस्तु
तिक्तं सूते फलमिह कृतिः प्रागनालोच्यमाना !'

३९

तत् श्रुत्वैवाऽरुणमुख इदं कौशिकः प्राह भूपम्--
'किं ब्रूषे भो ! तव वच इदं स्फोटयत्येव कर्णौ,
राज्ञी भूत्वा, सततमितरैः सेविता, मानिता च
का वा न स्यात् कुसुममृदुला, चन्द्रिकानिर्मला वा !

४०

आस्तां वा तत्, कथय मनसैतच्च- सर्वस्वदाने
योषिन्मूल्यं प्रभवति कथं दक्षिणापूरणाय ?
नाऽहं भिक्षुः श्रुतिविरहितः केवलं द्रव्यगृध्नुः
यावत्प्राप्तैरिह धनलवैर्यत्प्रहृष्टः प्रयायाम्

४१

किं वा श्रुत्वा नृप ! कलिकथां, तद्गतान् ब्राह्मणांश्च
तादृक्षं मां स्मरसि ! धनिकैः क्रीतयज्ञोपवीतम्,
अज्ञातस्वं, भृतिपरवशं, कातरं, स्वार्थदासम्,
कृत्यभ्रष्टं, मलिनचरितं, क्लिन्नमार्जारदीनम् !'

४२

राजाऽवोचत्- 'मुनिवर ! कथं तादृशं त्वां स्मरेयम् ?
पूर्णा भक्तिस्तव चरणयोरस्ति मे, तत् प्रसीद
अस्या मूल्यं प्रभवति न चेत् दक्षिणापूरणाय
मा गा रोषं, शरणमितयोः आवयोर्मूल्यमस्तु'

४३

१. यद्भविष्यो विनश्य तीत्यादौ बहुत्र भविष्यशब्दप्रचलनात् ।

एवं स्वैरं वहति पवने विकथाऽऽलापपूर्णे
तत्राऽसंख्ये सपदि रभसात् क्रेतृवृन्दे च सज्जे
अन्ते कालो विकटनयनो दन्तुरो भीमकायः
तत्र प्रेताधिप इव परः कोऽपि चण्डाल आयात्

४४

धानुष्कं तं नृपतिमितरान् क्रेतुकामान् कुलीनां--
श्चालोक्यैव श्वपचपतिनोपेक्षिते स्वस्य कामे
शान्तो दान्तो नृपमणिरसौ चिन्तयामास सूक्ष्मम्--
'दास्यं कस्योचितमथ कुतो भूतसेवा च सिध्येत् ?'

४५

अन्ते पश्यन् पुर उपगतं क्षुभ्यदाशं श्वपाकम्
शक्तैर्वर्गैर्विहतसरणेस्तस्य मर्माऽभिजानन्
नम्रः सत्वाधिकृतहृदयः साम्यधौतान्तरात्मा
सत्यप्रेमा नृपतिरथ तद्दास्यमेवाऽनुमेने

४६

"हन्तैवं माऽऽविलय सरणीं निर्मलां जीवनस्य,
भाग्यं सङ्कोचय न विततं, विस्मर स्वं न सत्वम्,
धर्मे, सत्ये, [1]सहसि, विभवे, भावनायां च शश्वत्
सीमा बद्धा भवति विधिना भूप ! तां मा विभिन्धि !

४७

नष्टाऽमूल्या शिरसि हि मणिर्नैव नागेश्वरस्य
रिक्तीभूता न नव निधयोऽद्याऽपि यक्षेश्वरस्य
नो वा भग्नो दिव उपवने कल्पवृक्षो मघोनः !
किं क्लैब्येन प्रहतयशसा, वीर ! सुप्तं धनुः क्व ?

४८

१ सहसि बले। द्रविणं तरःसहोबलशौर्याणीत्यमरात्।

यद्वा लब्ध्वा तव परिचयं सोऽपि काशीनरेशः
सेवेत त्वां गुणगणनिधिं स्वीयसिंहासनेन
वीरां जातिं, कुलमतुलितं विक्रमं, गौरवं च
धर्मैस्तैः क्षत्रियसमुचितैर्भूपते ! सत्कुरुष्व"

४९

एवं शब्दाः स्वहृद इव कुतश्चित् रहस्यप्रदेशात्
उद्गत्याऽस्य क्षितिपतिमणेः प्राविशन् कर्णयुग्मे
सोऽपि द्राक् स्वैः प्रकृतिवचनैस्तत् समाधत्त--- 'मा मा
स्वार्थायाऽहं परजनपदान् क्लेशयिष्ये कदाऽपि '

५०

इति दशमः सर्गः

एकादशः सर्गः

धृत्वा धृतिं, स्वं श्वपचाय वाञ्छते
विक्रीय भार्यातनयौ द्विजाय च
ततः प्रलब्धेन धनेन दक्षिणाम्
ऋषेर्यथावत् निरयातयत् नृपः

१

वियोगकाले महिषी शुचाऽऽकुला
नृपं यियासुं नयनाम्बुरुद्धया
ददर्श दृष्ट्यैव निमेषशून्यया
शशाक नो किञ्चिदपि प्रभाषितुम्

२

चलन्ति रूक्षा अलकाः समीरणे
नासापुटः क्षुभ्यति रोदनारुणः
नेत्रे अजीवे इव पश्यतोऽचले
गौरं मुखं स्कन्दति शोककालिमा

३

न ते दृशौ प्राणपतिं जिहासतः
त्यक्त्वा न वा तं चरणौ यियासतः
चेत् स्नेहजालं हृदयात् न दावयेत्[1]
कथं वियोगाय गतिं लभेत सा !

४

क्रेता द्विजोऽथ त्वरयत्यनारतम्
आहत्य मर्माणि गिराम् अजिह्मगैः,
सत्यं न यायात् यदि सा शितान् अपि
सहेत तान् भर्तृवियोगकातरा !

५

पतिव्रतायाः पतिरीश्वरः, प्रियम्
हृत्खण्डमन्यत्, सफलो मनोरथः
अद्वैतभावस्य शुभाऽवलम्बनम्
स्वयं कथं तद्विरहं सहेत सा !

६

परन्तु शक्तिं भवितव्यनामिकाम्
को वाऽतिशेते ? भुवनानि शास्ति या !
यस्याः प्रभावात् दयितं विसृज्य सा
जाता महिष्यद्य परस्य सेविका !

७

देव्या विषादात्म वियोगकातरम्
तत् इङ्गितं मौनमयं, द्विजस्य च
निविश्य साऽवृत्ति कटु त्वरा-वचो
नृपः प्रियां प्राह तदोचितं वचः---

८

१. न दावयेत् न दूरं कुर्यादित्यर्थः। स्थूलदूरयुवह्रस्वेत्यादिपाणिनिनियमात्।

"विलम्बसे प्रेयसि ! किं ?, न मानसम्
संयोगतस्तृप्तिमुपैति जात्वपि
अस्त्येव यातव्यमतः शुचं त्यज,
प्रयाहि विज्ञे ! निजकर्मणो गतिम्

९

ताः स्नेह-तन्त्रीर्हृदि मा प्रबोधय
नियच्छ चित्तं, जप सत्यमक्षरम्
परोक्षभावे हृदयं शनैः शनैः
उपैति शान्ति, न च मां स्मरिष्यति

१०

पुत्रोऽस्ति सङ्गे, द्विजबालकैः सह
क्रीडन् अयं ते व्यपनेष्यति व्यथाम्
अहं तु चिन्त्योऽस्मि न ते, ममाऽपि तं
स्नेहं हृदाऽस्मै वितर, प्रवर्धताम्

११

सत्यात् परं नास्ति महत् जगत्त्रये
स्नेह्यं च पूज्यं च शुभे ! विवेकिनाम्
चकास्ति तत् स्वात्मनि चेत् अलं शुचा,
त्वय्यस्म्यहं, मद्विरहस्य का व्यथा !"

१२

इति ब्रुवन्तं धरणीपतिं हसन्,
आकुञ्चयन् भ्रूयुगलं, विडम्बयन्
निषाद आह— "प्रमुखोऽसि वाग्मिनाम्
करोषि रे ! कार्यमहो कथं ? चल !"

१३

अन्ते च देवी नतमस्तका सती
द्वौ अश्रुबिन्दू दयितस्य पादयोः,
चित्ते समौनाश्रु मुखं च चिन्हवत्
निखाय सा क्रेतृपदानुगा ययौ

१४

राजाऽप्यधस्तात् चरणौ विलोकयन्,
मौनं श्रितः स्वं हृदयं मृदु स्पृशन्,
परामृशन् विप्लुतमात्मजीवनम्,
श्वसन् कदुष्णं श्वपचाऽनुगो ययौ

१५

पूर्वं तु देवी स्वमनो न्ययन्त्रयत्,
पश्चात् न शेके, न च यत्नमातनोत्
किञ्चित् गता स्नेहमयी पुनः पुनः
पराङमुखी भर्तृपथान् व्यलोकयत्

१६

तदा न सा ज्ञातवती सहाऽगतम्
पुत्रं, शुचा स्वं विकृतं च तद् गतम्
विक्षिप्तचित्तेव विकीर्णकुन्तला--
ऽविज्ञातपूर्वे पथि विह्वला ययौ

१७

देवी कपोतीव वियोजिता प्रियात्,
प्रसूनवल्लीव पृथक्कृता मधोः
निध्यायति म्लानहृदैव केवलम्
तापस्य, शोषस्य च पात्रतां गता

१८

चित्तं तु नास्तीव तदा तया सह
दृष्टिर्नवा गम्यपदानि वीक्षितुम्!
उन्मानसा सा विषमोपले पथि
शतं स्खलन्ती क्षतविक्षता ययौ

१९

शून्येन लक्ष्येण, निरात्मना हृदा
क्वचित् पथि ध्वान्तमये गतेव सा
मार्गं, ततस्त्यान् निलयान्, महीरुहान्,
दिशश्च दृष्ट्वाऽपि ददर्श नो हृदा

२०

सुदूर-मार्गं समुपेत्य सा मुहु-
र्व्यचिन्तयत्–– "कीदृगहं प्रमादिनी !
व्यस्मार्षमात्मव्यथयैव हन्त ! तम्
प्रष्टुं–– 'वसेः कुत्र, कदा मिलेः' इति"

२१

परं परेच्छाम् अनुवर्तमानया
मया, तथा तेन च कुत्र वा कदा
प्राप्यः स्वतन्त्रः समयः प्रभाषितुम्?
ते ते गता एव हि हन्त वासराः!

२२

विधे ! समर्थोऽप्यतिनिष्ठुरोऽपि सन्
किं माम् अहत्वा बत ! नित्यतापिकाम्
सुदुःसहां भर्तृवियोगनामिकाम्
उल्कां मदीयोरसि संन्यवेशयः

२३

विचिन्तयन्त्येवमनारतं द्विजम्
अनुप्रयान्ती महिषी सपुत्रका
प्रापत् प्रदोषे गृहमस्य, यत्र सा
स्वजीवनं धक्ष्यति दासताऽनले

२४

प्राप्यैव राज्ञी सह सूनुनाऽनमत्
द्विजस्य पत्नीं सकुतूहलेक्षणाम्
आसीत् नतिः साऽन्तरभक्तिनोदिता,
न कृत्रिमा किङ्करता-समर्थिता

२५

द्विजेऽथ विश्राम्यति दीपरोचिषा
दासीमुखं साधु निरूप्य सस्मयम्
सा ब्राह्मणी प्राह पतिम्--'कथंन्वियम्
कुर्यात् गृहे कर्म मृदुः सुखे स्थिता ?

२६

कर्माऽक्षमे वस्तुनि योजितं धनम्
स्वयं विधेयं गृहकर्म पुष्कलम्
एषोऽपि बालस्तृणसारणाक्षमः
गृहव्ययायैव हि केवलं भवेत् !

२७

शीर्षे समे पक्वचराः कचा अपि
तथाऽप्यपक्वैव मतिस्तु कर्मणे
वदानि किं वा न वदानि वा कथम्
संचालयेत् मे गृहकर्म कोऽनिशम् ?'

२८

निशम्य तत् सा महिषी व्यचिन्तयत्--
"स्त्रिया जितं गेहमिदं विलोक्यते,
क्षुरस्य धारेव चलत्यहो ! शिता
जिह्वा गृहिण्याः, इह का स्थितिर्भवेत् !

२९

किं वा न तिष्ठानि कथं ? स्वकर्मणा
दासीकृताऽत्रैव गृहे, भवत्विदम्,
भर्तुर्वियोगं सहमानया मया
न स्यात् विषह्यं कतमन्नु संकटम् !

३०

आस्ताम् इतः, सत्यधनः प्रियो मम
स्यात् कीदृशे कर्मणि, कीदृशे गृहे ?"
एवं मृशन्त्येव पुनर्हृदा ययौ
सा तस्य हार्देन जितेव भूपतिम्

३१

राजाऽधुना किं नु विचिन्तयन् भवेत् ?
कुर्वन् भवेत् किं श्वपचानुदेशतः ?
स्वार्थात् अशोचन् अपि मत्कृते ध्रुवम्
शोचेत्-- 'वराकी कति चिन्तयेत्' इति !

३२

वत्सोऽप्ययं प्राणनिभो वियोजितः,
कथं धरेत् स्वं मन आर्द्रवेदनः ?
किं वा मुहुः पार्श्वत एनमुत्सुकः
भ्रमात् 'सहाऽस्तीति' स मार्गयन् भवेत् !

३३

सा चिन्तयन्त्येवमगात् स्थितिं जडाम्
निगीर्णसंज्ञेव शुचा प्रगाढया !
अज्ञातमेवाऽक्षियुगात् सृतं जलम्
तस्यास्तथैवोच्छ्वसितानि निर्ययुः

३४

गाढं तमश्चेत् न पिबेत् दिवाच्छविम्
निदाघसन्ध्यामपि वायुशीतलाम्
विद्यात् कथं तापमयी ?, तमोऽपि तत्
अन्तस्तमोव्याप्ततयैव वेत्ति सा !

३५

भुक्त्वोत्थितेषु द्विजबालकेषु सा
तेषां विशुद्ध्यै सलिलं समार्पयत्
उच्छिष्टभाण्डान्यवचित्य सत्वरा
संमार्जितुं चाऽरभताऽश्रुविक्लवा

३६

प्राप्तो विदूरात् क्रियतः क्षुधार्दितः
स बालको रोहित आत्मनो व्यथाम्
नवे गृहे कं नु वदेत् कथं ?, प्रसूम्
दृशोर्गिरा शंसति दीनदीनयोः

३७

आसीत् नु किं मातृकरे त्वतः परम्
विनाऽश्रुपूरात् उत दीनदर्शनात्
अतः स बालोऽपि निविष्टचेतनः
शशाक वक्तुं न मुखेन वेदनाम्

३८

तृप्तेषु तद्गेहजनेषु गेहिनी
देव्यै सनिर्बन्धमदत्त भोजनम्
तस्या गलो न न्यगिलत्, सुतस्तु स
आस्वादमास्वादमभक्षयत् द्रुतम्

३९

गलेन संलक्ष्यशिरेण संभ्रमात्
सुस्वद्य भुञ्जानमिमं विलोक्य सा
देवी हृदाऽवोचदितः क्व मन्दिरम्,
स्निग्धे क्व वा लालनपोषणे तव ?

४०

पुराऽपि भीत्या च पलायनेन च
कालो गतोऽद्याऽपि तवेदृशी स्थितिः
विस्मृत्य भाग्यं किल पूर्वजन्मनि
जातोऽसि कष्टैः सह रोमहर्षणैः !

४१

स्वग्रासमाच्छिद्य ददत् पिताऽपि ते
दासो न सङ्केऽस्ति, तथा प्रसूरपि
दासी परस्याऽन्यगृहे कुतस्तव
प्रतिष्ठितिर्जीवसि वा कमाश्रितः ?

४२

दैवेऽनुकूले शतशः समाश्रयाः
भवन्ति, रुष्टे तु न कोऽपि जन्मिनाम्,
प्रागेव राज्ञा त्विदमीक्षितं, यतो–
ऽवदत् स––'सत्यं शरणं व्रजे' ति माम्

४३

सर्वं महिष्या करणीयमस्ति तत्
उच्चावचं कर्म गृहे यदापतेत्
निरीक्षते सा गृहिणी तु तत्कृतम्
निष्कोष्य दन्तश्रवणं तृणादिना

४४

समाप्तमात्रे सकृदेककर्मणि
सा तां पुनर्नोदयतेऽन्यकर्मणि
तस्मिंश्च चीर्णेऽङ्गणरिङ्गणाय ताम्
वदेत्, न चैनां सहते सविश्रमाम् !

४५

कोषो न वृष्टोऽस्ति दिवोऽत्र सद्मनी-
त्येवं तुदन्ती गृहिणी नृपात्मजम्
दूरेऽपि तं प्रेषयतेऽतिनिष्ठुरम्
बालं विबुध्याऽपि तृणेन्धनादये

४६

स बालकः किं विदधातु ? नित्यशो
मात्रा सबाष्पाकुलितं विलोकितः
पतन्, स्खलन्, घासभरं वहन् कृशः
पिपर्ति दुष्टस्य कुतूहलं विधेः !

४७

भर्ता कथं तिष्ठति कुत्र किंदशः ?,
पुत्रः समक्षेऽस्ति तथादशः, स्वयम्
तथाऽस्ति, चित्रं ! महिषी कथं मनो
धरेत् ?, प्रशस्या खलु तत्सहिष्णुता !

४८

श्रान्ताऽपि गाढं दिवसे तथा श्रमैः
निद्रातु रात्रौ कथमात्तवेदना ?
मासत्रयं यापितमर्धनिद्रया
चिन्तां विना किं शरणीकृतं तया ?

४९

"एतादृशे सद्मनि जीवनं मया
सदा कथं याप्यमसह्यकृच्छ्रतः
श्रान्त्वा मृतायामपि सर्वदा मयि
सन्तुष्टिरस्त्येव न गेहिनी-हृदि

५०

सा केवलं ध्यायति— 'मद्धनं गतम्,
पूर्येत तत् कस्य कलेवराऽसृजा ?'
यथाऽस्ति तस्यास्तनुरस्ति मे तथा
दास्येन किं गात्रमयोमयं भवेत्

५१

ततोऽपि दास्याः सुत इत्यनादरम्
हेलां च कुर्वन्ति सदा ममात्मजे
श्राम्यन् स रात्रिन्दिवमेव बालकः
क्षयन् शकुन्तेन समोऽभिदृश्यते

५२

ईषत् शिरोरुज्यपि गेहिनी शुचा
भैषज्ययेत् स्वान् तनयान् बहुव्ययैः
दास्यात्मजे स्युः कति तादृशो रुजः
विचारयेत् कः शमयेच्च यत्नतः ?

५३

बालः कियत् खादति पक्षिसन्निभः
क्षिप्तेन सत्यं कवलेन तृप्यति
तथाऽप्ययं साम्प्रतमक्षिसङ्कुरो
जातोऽस्ति, 'सर्वं गृहमाहरेत्' इति

५४

मिथः प्रकृत्यैव चलन्ति बालकाः
रुदन्ति, कर्षन्ति, पुनर्मिलन्ति च
भज्येत नश्येदपि किञ्चिदत्र वा
दोषस्त्वनाथेऽस्ति ममैव पुत्रके

५५

पुत्रोऽस्ति सङ्गे परमन्यकर्मभिः
प्रनष्टकाला, समयात् अकिञ्चना
क्षुधं न पृच्छामि, न तं परिष्वजे
धिक् धिक् परान्नं, परतन्त्रतां च मे !

५६

पारावतस्त्री क्षुधिता यदुञ्छति
स्वैरं स्वपोतेन समं कणादिकम्
वरं तथात्वं हि विमुक्तजीवितम्
धिक् धिक् परान्नं, परतन्त्रतां च मे !

५७

किन्त्वस्ति मेऽयं तनुजः कियान् ऋजुः
प्रवुद्धचेताश्च य एवमापदि
मग्नोऽपि बालोऽपि नृपात्मजोऽपि सन्
न दीनताम् अञ्चति वाचि, वाऽऽकृतौ

५८

एवंभविष्याम् अवगत्य मां विधिः
पुराऽभवत् बद्धकरो हि सन्ततौ
विद्याम् कथं तत् ? बत ! मातृसङ्गतः
पुत्रोऽपि दग्धः परतन्त्रताऽनले !

५९

नो दुष्कृतं नौ प्रथमं स्वतन्त्रयोः
पुत्रैषणायां, स तु दुष्कृती भवेत्
योऽन्येन बद्धोऽप्यनिरस्तबन्धनो
दासीचिकीर्षुः प्रकृतीरभीप्सति"

६०

पश्यन्त्यधःकृत्य करस्य शोधनीम्
वितर्कयन्त्येवमनिष्टमात्मनः
देवी प्रबुद्धा गृहिणीगिरा द्रुतम्
स्मृत्वेव, भीत्वेव निरास सङ्करम्

६१

"शतं सहस्रं कति वा वदान्यहम्,
नैकं दिनम्, श्रान्तमहो ! मुखं मम
अस्यास्तु चेष्टाऽस्ति पुनर्यथायथम्,
साक्षात् अलक्ष्मीरियमाविशत् गृहम् !

६२

म्लानं मुखम्, साऽश्रु विलोकितं, विना
बीजेन निध्यानमिदं च सर्वदा
एतादृशैर्दूषितलक्षणैर्गृहे
भवन्त्यनिष्टान्यवितर्कितानि हि !

६३

पापं न वाच्यं, गृहकर्म शोभनम्
शीघ्रं च वर्त्ति, न चोत्तरं क्वचित्
तुषारशुभ्राऽपि मुखाकृतिस्त्वियम्
सदैव सन्ध्येव तमोजिता कुतः ?

६४

मृतेऽपि पत्यौ क्रमशो मनोव्यथा
विलीयतेऽस्यास्तु पतिर्मृतो नहि
वियोगमात्रे कुत ईदृशी व्यथा ?
सत्यं ह्यलक्ष्मीरियमाविशत् गृहे !"

६५

इत्येकादशः सर्गः

द्वादशः सर्गः

इतस्तु नैदाघरविप्रतप्ते
स्वर्निम्नगारोधसि मानुषाणाम्
आशां च रागं च तुदत् श्मशानम्
आसीत् यमस्येव गृहं द्वितीयम्

१

यायावराणां कियतां युगानाम्
नृणां च नानाविधकर्मसाक्षि
पुराऽपि सर्वप्रथमं यदेव
सतां व्रजे साम्यधियं ससर्ज !

२

मध्यन्दिने, सौरकरे शवानाम्
यत्राऽस्थिलेखा परितो विकीर्णा
तृप्तिं गतानां खलु नैर्ऋतानाम्
द्रंष्ट्रा यथा भाति विशब्दहासा

३

ते जीर्णजीर्णा विरलाश्च वृक्षाः
वेतालवासा इव तत्र सन्ति
अहर्निशं ये कति वा शताब्दीः
श्मशानसेवां विदधुर्न विद्मः !

४

गाम्भीर्यमुद्राऽऽमिषदर्शनान्ता,
लम्बो गलो, दूरदृशौ दृशौ च
का वृक्षशाखा, ननु का च भूमिः
सन्त्यत्र गृध्राः शवमात्रलक्ष्याः

५

कालातिकालाः शवमांसपुष्टाः
मिथःप्ररुष्टा भषकाश्च यत्र
विलोकनैरेव जनान् अजस्रम्
यमस्य दूता इव भीषयन्ते

६

कति प्रदग्धाः, कति दग्धकल्पाः,
दाहाय नीताः कति तत्क्षणे च
तादृक् क्षणो नैव समस्ति तत्र
दैवात् यदैकोऽपि शवो न सज्जः !

७

दन्दह्यते तत्र चिता शवानाम्,
ज्वाला नभः क्रामति शोणशोणा,
धूमो वसागन्धकटुर्भिनत्ति
नासाम्, समीपे च तमस्तनोति

८

ज्येष्ठोऽस्ति मासः, परुषो निदाघः
संताप्य, संशोष्य च शास्ति विश्वम्
निरङ्कुशं शासनमेकतन्त्रम्
प्राप्येव को वाऽस्ति तदा ह्यद्रूनः ?

९

निर्बाधचण्डांशुकरप्रपातात्
तप्तेन लोहेन समोऽस्ति घट्टः
यत्रत्यधूलौ चणकोऽपि सम्यक्
भृज्येत कस्तत्र पदं निदध्यात् !

१०

ग्रीष्मः स, सन्तप्तशिलः स घट्टः,
मध्यन्दिनं तत् ज्वलिता चिता सा !
परन्तु सोढ्वा सममल्पभाग्यः
एकः शवान् संस्कुरुते तदाऽपि

११

दैवाऽहतो ह्येष स एव राजा
सत्याय यो राज्यसुखानि हित्वा,
विक्रीय पत्नीतनयौ, स्वयं च
चण्डालदासो भवति श्मशाने !

१२

स्वामी श्मशानाधिपतिः श्वपाकः
श्मशानशुल्काहृतये, शवानाम्
दाहाय चैनं नृपतिं नियुङ्क्ते,
स निश्छलं निर्वहति स्वकृत्यम् !

१३

सन्ध्ये च रात्रिं च दिनं च तूष्णीम्
प्रवर्ततेऽसौ मृतकस्य दाहे
न तत्र कश्चित् सहृत्, न बन्धुः,
प्रष्टा न वा तस्य तृषः क्षुधश्च

१४

नाऽस्ति श्मशानात् अपरोऽस्य वासः
कौपीनवस्त्रात् अपरं च चैलम्
सैषा विधेः क्रूरतमा हि लीला
लोके सुधीभिः प्रथमा व्यदर्शि !

१५

ग्रीष्मे हि नाना शिशिरोपचारान्
कुर्वन्ति पौरा इह तापशान्त्यै
एवं सुयोगोऽस्य कुतस्तथाऽपि
सोऽयं धमन् अस्ति मुहुश्चिताग्निम्

१६

अङ्गारकालोऽतिकृशश्च देहो,
नेत्रे गभीरे, जरठाश्च केशाः,
स्विन्नं च शुष्कं च मुहुर्मुहुस्तत्
यज्ञोपवीतं च विलोक्यतेऽस्य

१७

धूमोऽतिवेलं तनुमावृणोति,
ज्वालाऽहिजिह्वेव विलेढि वक्त्रम्,
स्वेदस्य धारा निटिलात् वहन्ती
गण्डौ स्पृशन्ती पुनरेति शोषम्

१८

मृतात्मनो ज्ञातिकुटुम्बकानाम्
कोलाहलैः शोकमयैः अजस्रम्
शवक्रियाभिश्च निरन्तराभिः
सुप्त्यै न कालोऽस्ति न भोजनाय !

१९

'सत्यां क्षितौ किं कशिपोः प्रयासैः
बाहौ स्वसिद्धे ह्युपबर्हणैः किम्'–
विद्वांस एवं ब्रुवते गिरैव
प्रदर्शितं तेन हि कर्मणैव

२०

गीतिः क्व साऽद्य स्तुतिपाठकानाम् ?
कुतोऽयमेकान्तकटुः श्वरावः ?
गतं क्व हर्म्यं सुधया प्रलिप्तम् ?
श्मशानमेतत् च कुतोऽस्थिपूर्णम् ?

२१

स्निग्धौ सदोत्कौ महिषीसुतौ क्व ?
विश्वस्तमन्तःपुरमस्ति तत् क्व ?
तुष्टप्रिया क्व प्रकृतिः ? स्वपार्श्वे
कुतोऽद्य गृध्रा भषकाश्च जाताः ?

२२

परं पुरा राज्यसुखे स्थितोऽपि,
दैवात् पुनस्तां विपदं गतोऽपि
सर्वत्र सत्यानुभवात् प्रहृष्टः
स स्वस्थितौ शोचति नैव किञ्चित्

२३

स्वदुर्दशाया विषये त्ववेगाः
ता जातुमात्रप्रभवाः शुचस्तु
अत्यल्पकुल्या इव तोयधिं, तम्
ज्ञानाम्बुधिं नाऽविलयन्ति किञ्चित्

२४

आयातु कामं जनताऽत्र, किन्तु
द्वौ एव राज्ञोऽस्य सदा सखायौ
अन्तःस्फुरन् सत्यमयो विवेकः
बहिर्ज्वलन् सैष चितानलश्च

२५

अहर्निशं रोगयुजां शवानां
कीटप्रदाहैः जनमात्रसेवाम्
कुर्वन् स भूपो हृदि वर्धमानाम्
सेवातृषं स्वां शमयन्निवाऽस्ति

२६

अद्यात्मनो बन्धकरीम् अपार्थाम्
संकीर्णताम् प्रास्य विवृद्धसत्वः
ममत्वशून्यः स निरीहभावैः
निषेवते मानवतां क्रियाभिः

२७

कुटुम्बतो जातिमतश्च देशम्
प्राप्ता नृपालस्य दृगद्य तं च
अतीत्य विश्वं प्रययौ विशालम्
असीमदृष्टिर्हि सतां प्रवृत्तिः !

२८

व्यग्रं सदा लोकहिताय चित्तम्,
सेवापरं द्वन्द्वसहं शरीरम्,
सत्येन पूतं वचनं च बिभ्रत्
स एव मूर्तं त्रिविधं तपोऽभूत्

२९

राज्यं गतं तस्य, गतं सुखं च
सर्वं गतं किन्तु ततोऽप्यनर्घम्
वर्वर्ति किञ्चित् धनमात्मकोषे
यस्यैव गुप्त्यै स जहात्यशेषम्

३०

न्यक्कृत्य सर्वा अपि ता विभूतीः
सत्ये हुतोऽनेन निजो यदात्मा
न तेन तस्यैव यशोऽस्ति किन्तु
तत् भारतस्यैव हि पुण्यभाजः

३१

न भारतस्यैव समीक्षिते तु
स मर्त्यमात्रस्य यशःप्रदोऽभूत्
यतः श्रुतो न त्रिदिवेतिहासे-
ऽप्यनेन तुल्यः किल सत्यवीरः

३२

सैषोऽस्ति सर्वप्रथमो य एव
मनुष्यमात्रस्य हितेच्छुरूर्व्याम्
जयाय, भद्राय, विभूतये च
प्राकाशयत् सत्यमयं प्रदीपम्

३३

सैषोऽस्ति सर्वप्रथमो, य एव
शीतादिकद्वन्द्वजयेन विश्वम्
मर्त्यात्मनो दर्शितवान् विशालम्
सत्त्वं, ह्यदम्यत्वमजय्यतां च

३४

सैषोऽस्ति, यः प्राक् असुरात्मभाजाम्
बलीयसीः पाशविकीश्च शक्तीः
समूलमुन्मूलयितुं द्रढिष्ठम्
अशक्तिकेभ्योऽदित सत्यमस्त्रम्

३५

तपोमयं बोधमयं च तत्र
तदुत्थवातावरणं ब्रवीति---
'लोका न गर्वं वहत स्वभाग्ये
कस्याऽपि न स्थायि भवेत् गुरुत्वम्

३६

प्रपश्यत प्रातरहर्मणेः का
तेजस्विता, का क्रमिकोन्नतिश्च !
दृष्टे, पुनः केन हृते प्रदोषे ?
कस्याऽपि न स्थायि भवेत् गुरुत्वम्

३७

व्योमाजिरे वा निशि तारकाणाम्
का दीप्तिरासीत् ?, अतुला च शोभा ?
प्रातः कुतस्तत् जगदेव लीनम् ?
कस्याऽपि न स्थायि भवेत् गुरुत्वम्

३८

नदीषु कूलङ्कषता क्व लीना ?
वनेषु वा श्यामलता[1] क्व लीना ?
प्रयान्ति तास्ता ऋतुसंपदः क्व ?
कस्याऽपि न स्थायि भवेत् गुरुत्वम्

३९

एकातपत्रं क्व भुवः प्रभुत्वम्
क्व वा विगीतम् श्वपचस्य दास्यम् !
स्फुटं हरिश्चन्द्र-कथा ब्रवीति
कस्याऽपि न स्थायि भवेत् गुरुत्वम्

४०

परन्त्विदं सत्यतयाऽवधार्यम्–
परिस्थितेर्दुःखमुपैति मर्त्यः
परिस्थितिः सा च कुतोऽप्यदृष्टात्
नायाति, किन्त्वेति समाजपापात्

४१

परं सपापोऽपि समाज एष
न जातु निन्द्योऽपि तु शोध्य एव
समाजशुद्धेर्हि फलं सुराणां
लोकः समृद्धत्वममर्त्यता वा !

४२

समाजशुद्ध्यैव हि सर्गमेतम्
सत्यं शिवं सुन्दरदर्शनं च
कर्तुं वहन्ति [2]स्थितबुद्धयस्ते
विभज्य लोकोत्तरकार्यभारम्

४३

---

१. श्यामलता हरितिमा ।

२. स्थितप्रज्ञाः कर्मयोगिनः मर्त्या अमर्त्या वा ।

पूर्वार्धभूधुर्यमिमं नरेशम्
प्राप्येव सूर्योऽल्पितकार्यभारः
पश्चार्धभूमेः अवलोकनाय
यास्यन् इवाऽस्ताचलमाविवेश

४४

विवस्वतः शोषनयेन तीव्रम्
प्रबोधितानां पृथिवीकणानाम्
शान्त्यर्थिनी क्रान्तिरिवाऽतिधीरम्
सन्ध्या दिवं स्पृष्टवती भुवं च

४५

ग्रीष्मेऽत्र तीरे मनुजाः श्रयन्ते
गङ्गाम्बुशीतं खलु सान्ध्यवातम्
अस्तं प्रयाते तपने प्रचण्ड-
करे यथा शास्तरि शान्तिकालम्

४६

तदैव काशीपतिरत्र भूपम्
उपेयिवान् आर्यगुणप्रतीक्ष्यम्
शक्तिक्षमासङ्गमभूमिमेतम्
अन्तःप्रशंसन् स्फुटमेवमूचे--

४७

"शृणोमि साकेतपुरे प्रजायाः,
नृपस्य गाधेस्तनयस्य चाऽपि
मिथोऽस्ति वैरं परिवर्धमानम्,
मुनिश्च राज्यं विजिहासुरस्ति

४८

तद् गच्छ तत्र प्रजया वृतोऽसि,
वा मे पुरो राजपदं गृहाण,
चण्डालदास्यं तव नोचितम् भो !
एतत् तु घातस्तव सत्यनाम्नि !"

४९

तं प्रत्यवोचत् नृपतिश्च-- "राजन् !
यत् भाषमाणोऽसि दयार्द्रचेताः
सौजन्यमेतत्तव, किन्तु नास्ति
शोच्यस्तथा सत्यरतो ममाऽत्मा ?

५०

आदृत्य पूर्वं जनभावनां ताम्
भूपाल ! राज्यासनमग्रहीषम्
विनैव तद्बन्धनमस्ततन्द्रः
इतो विधित्सामि समाजसेवाम्

५१

स्वार्थाय नो कस्यचिदप्यमूल्यम्
पदं जिघृक्षामि, बिभेमि सत्यात्
सत्यस्य, देशस्य, जनस्य वाऽद्य
का वा समस्याऽस्ति तथा विधातुम् ?

५२

निरर्थकं राजपदं मतं मे,
नैवं वदाम्यद्य ततश्च्युतत्वात्
लिप्सा पुनस्तस्य यदि क्रियेत
मत्कार्मुकं दास्यति तत् क्षणेन

५३

किं जातु दाह्यस्य कलेवरस्य
विभूषणे राजपदे नियन्त्र्य
अनन्तशक्तेः प्रभवः त्रिलोक्याः
आदर्शदस्तिष्ठति मानवात्मा ?

५४

यथा शरीरेण समं श्मशाने
जातिः, कुलं तच्च ससंप्रदायम्
विलीयते राजपदं च राजन् !
तथैव, का तत्र विलोभ्यताऽस्ति

५५

क्रियेत चेत् साधु समाजसेवा
किं राजलिङ्गैर्विविधान्तरायैः ?
क्रियेत चेत् वाऽथ समाजबाधा
किं राजलिङ्गैर्जनभारभूतैः ?

५६

शान्ता, बुधा चेत् प्रकृतिर्विशुद्धा
कोऽर्थो मुधा राजपदेन राज्ञः ?
कर्तुं तथा तां यदि वा न शक्तम्
कोऽर्थो मुधा राजपदेन राज्ञः ?

५७

यदा हि सर्वत्र भुवि प्रशान्ता
चकास्ति बन्धुत्वमयी मरीचिः
तदा तु काऽवश्यकताऽस्ति राज्ञः
राज्यस्य, शस्त्रस्य, दलस्य, चाऽपि

५८

राजन् ! अयोध्याविषये तु वार्ता
सत्यैव चेत् सा प्रकृतिः प्रबुद्धा
सत्याय, देशाय सदैकलक्ष्या
विचार्य भूपम् वृणुयात् तदन्यम्

५६

युक्तं च तत् , स्वं प्रकृतिर्हृदा चेत्
न विश्वसेत् गाधिसुतो वसेत् किम् ?
प्रजा च तं स्वप्रतिकूलनीतिं
मुनिं वृथा राजधिया श्रयेत् किम् ?

६०

कायेन, वाचा, मनसा प्रजायाः
कल्याणकारी यदि नाऽस्ति, तर्हि
घाताय, शोषाय, नियन्त्रणाय,
दैन्याय राजा किमघाय कल्प्यः ?

६१

स लोकभक्तो यदि नास्ति, विज्ञा
प्रजा किमेकस्य नृपासुरस्य
तृष्णाशमायैव हि चेतनां स्वाम् ,
कोषं, भुवं चाऽप्युपढौकयेत !

६२

स स्वानुकूलो यदि न प्रजा सा
स्वतन्त्रतां स्वाम् उपहृत्य तस्मै
आजीवनं पञ्जरपक्षिवत् किम्
तस्याऽनुकम्पाम् अनुरुध्य जीवेत् !"

६३

एवं वदत्येव नृपे शवोऽन्यः
समागतोऽथाऽस्य कुतोऽवकाशः ?
विसृज्य काशीनृपमस्तरागः
स कर्मयोगी जगृहे स्वकर्म

६४

इति द्वादशः सर्गः

त्रयोदशः सर्गः

इतो राज्ञी भर्तृहीना दासीभूता द्विजालये
पदे पदे कियत् दुःखं लभते, वेत्ति कः समम्

१

सा साध्वी पतिदेवं स्वं, सत्यनिष्ठां च तस्य ताम्
हृन्मन्दिरे स्थापयन्ती नियोगं पर्यपालयत्

२

विलोकयेत यत्किञ्चित् कुस्वप्नं वा कुलक्षणम्
साऽनिष्टं शङ्कते पत्यौ, योषितो ह्यबला हृदा !

३

सदने तत्र यत्किञ्चित् भग्नं वा विकृतं भवेत्
तस्याः शिरसि तत् सर्वम्, धिक् भृत्यत्वं परालये !

४

मिथ्याऽऽरोपः स, हेला सा, गृहिण्याः साऽकृतज्ञता
सैवं त्रिशूले तिष्ठन्ती नयति क्लेशवासरान्

५

एकत्रैव गृहे भिन्नं खाद्यं, भिन्ना स्थितिर्मिथः
तत्रैव बुबुधे राज्ञी वर्गौ द्वौ स्वामिदासयोः

६

नीराजनं प्रकुरुते, घण्टां वादयति द्विजः
न प्रेक्षते--'स्वस्य गृहे कः कथं नाम जीवति !'

७

गृहे दुग्धापव्ययोऽस्ति प्रजापत्यादयोऽमराः
विस्मयन्तेऽग्निशिखया भुङ्क्तेऽन्नं चेटिकासुतः !

८

हृष्टाः पुष्टाश्च ते सन्ति तत्रैव द्विजसूनवः
हन्त ! दास्याः सुतत्वेन फुत्कृतोऽपि पतत्यसौ

९

द्वे भोग्ये तस्य बालस्य तत्र- स्वस्वामिसन्ततेः
अर्धजीर्णानि वासांसि, भुक्तशेषं च भोजनम् !

१०

समेऽपि मानवत्वे ते सधना एव मानवाः
निर्धनास्तु श्वपङ्क्तिस्था इति तत्र स बुद्धवान्

११

ज्ञाते श्रुतेऽपि किं तेन यस्य रुद्धा समा दिशः
अशक्तस्य बहु ज्ञानम् चिन्तावर्धनमेव हि

१२

क्रीतोऽसौ गेहकार्यार्थ, कर्मणैव दिनं गतम्
उद्यच्छेत् किं कथं कर्हि ? धिक् दास्यं गाढबन्धनम्

१३

दलिता न्यायमन्वेष्टुम् अधिकारेण वञ्चिताः
अधिकारश्च मृत्वैव लभ्यः, केयं विचित्रता !

१४

शोषनीत्या धनिकता, धनिकत्वात् सशक्तिता
शक्तिसत्वात् देवभावो देवत्वात् सर्वसेव्यता !

१५

स्रष्टारं दैन्यतत्त्वस्य धनिनां नयदुर्ग्रहम्
अज्ञानेन, क्लीबतया, स्थितया चोपासते जनाः

१६

वृत्तिकाठिन्यतः शिक्षाऽऽघातस्तेन ह्यजागरा
ततः स्ववर्गेऽसंघटनम् ततश्चाऽन्यायितन्त्रता !

१७

जीवनेऽहर्निशं दुष्टैः दलिता अपि मानवाः
स्वआशयाऽद्य जीवन्ति, सत्यम् आशैव जीवनम् !

१८

मितंपचा यक्षवित्ताः शिक्षाचातुर्यचुञ्चवः
घ्नन्ति वैधेन खड्गेन मुष्टिस्थान् निर्धनान् सतः

१९

कल्पस्थायि यशो हित्वा, देहे द्रव्ये च नश्वरे
बद्धाशास्ते स्वात्महनो न हन्युर्वा कथं परम् !

२०

स्वाम्येष ब्राह्मणो जात्या केवलं वादिसंसदि
विकत्थताम् आत्मवादम् अज्ञात्वाऽन्यात्मनो व्यथाम् !

२१

देहात्मवादिनो मान्या ईदृशात् आत्मवादिनः
देहसारास्ते दर्येरन् परदेहे, नहीदृशः !

२२

इत्येवं भावयन्नेव रोहितः साश्रुलोचनः
सविधे मातरं प्रोचे प्रलग्नां गृहकर्मणि–

२३

'प्रयाता बहवो मासाः, किमवस्थः पिता भवेत्
तिष्ठेत् कुत्र कथम् ? नित्यं नः स्मरेत् स वयं यथा

२४

तत् स्वामिनीं निवेद्य त्वं मां प्रेषय तदन्तिकम्
प्रच्छं प्रच्छं तत्स्थलेऽहं यामि तद्दर्शनोत्सुकः

२५

दर्श्यं दुःखं तु किं ? तस्याऽपीदृगेव दशा भवेत्
केवलं मनसः शान्त्यै मातर्यामि तदन्तिकम्

२६

अलं वक्तुमहं नैतां भैरवीमिव कोपनाम्
निवेदय त्वमेवैनाम् 'प्रत्येष्यामीति मद्वचः"

२७

श्रुत्वा पुत्रवचो देवी हृदि विद्धेव केनचित्
अन्तर्व्यथां निर्विशन्ती प्रोचे तं दीनलोचना––

२८

"नूनं वक्ष्याम्यहं, किन्तु वत्स ! वेत्स्येव पुष्कलम्
अतिदेवाः स्वामिनोऽस्मद्वचनं श्रृणुयुर्न वा !

२९

चित्तं तु किं न मेऽपि ष्यात् तेन संगन्तुमुत्सुकम् ?
करवाणि च किं वत्स ! स्मृत्वा वक्षो विदीर्यते

३०

अस्तु, वत्स ! नभः पश्य, गतो दूरं दिवाकरः
कुप्येत् सा गच्छ कार्याय, प्रार्थये तत्तु यत्नतः"

३१

इतस्ततो वीक्ष्य मन्दम् एवं मात्राऽभ्युदीरितः
रोहितो दारुघासादि सञ्चेतुं निरगात् गृहात्

३२

पुत्रः प्रयाति कन्थाभिः साक्षात् सम्राज आत्मजः
कथं वहतु सा राज्ञी क्षत्रियाणी निजं मनः ?

३३

साऽतोक्ष्यत् यदि सोऽधीत्य सायमैष्यत् सपुस्तकः
ऊढघासः स्खलन् बालः सुत्कुर्वाणो निवर्तते !

३४

स्वामिपुत्राः चलित्वैव, खेलित्वैव प्रभुञ्जते
तथा श्रमेऽप्ययं गेहेऽकर्मण्योऽद्मर उच्यते !

३५

इत्यादिर्वेदना राज्ञ्या अस्त्येव पुनरद्य तु
स्पन्दते तद्दक्षिणाक्षि तत् साऽत्यन्तं विशङ्कते----

३६

"हृद्देवः स क्व दूरेऽस्ति पुरा राजसुखे स्थितः
दासीभूतोऽधुना हन्त! कति दुःखानि निर्विशेत् !

३७

आसीत् विरहकालेऽपि स कृशः प्रागपेक्षया
शङ्केऽधुना तु पत्रस्य पुरुषः स्यात् सचेष्टितः

३८

अकरोत् राज्यविभ्रंशं तदक्षिस्फुरणं पुरा
विधित्सत्यद्य किं दैवम्, को निषेधेत् तदीहितम् !

३९

सदाऽऽगमनकालस्तु व्यतीतो, रोहितोऽपि किम्
[1]नाऽगात्, यद्यपि तेऽन्येऽन्ये बालका अपि नाऽगताः !

४०

घासाद्यलब्ध्वा निकटे किं वा दूरमगात् भयात्,
अलाभे स्वल्पलाभे वा गालीमाप्नोति बालकः"

४१

एवं देव्यां बलादेव भावाः शङ्कामलीमसाः
दुर्दिनेष्वाविला भङ्गा गिरिणद्याम् इवाऽऽययुः

४२

इतः श्मशाने सैवाऽसीत् स्थितिरादर्शदर्शना
हृदि सत्यं, करे कृत्यम् किमन्यत् कर्मयोगिनः !

४३

यत् शङ्कते, भावयते लोकभूत्यै नृपो दिवा
रात्रौ तदावर्तयन्ति तस्य तन्द्रा लघुक्षणाः

४४

तत्राऽयोध्याजनाः सर्वे नयाय नृपमागमन्
यथा स्वच्छाय पयसे चक्राङ्का मानसं सरः

४५

---

१. न आगात् नागत इत्यर्थः ।

ऊचुस्ते नृपतिं साऽस्त्रम्--"अयोध्यायाः, विशां च किम्
कुशलं पृच्छसि ? वयं त्वां वीक्ष्यैव शुचाऽर्दिताः

४६

विशालताऽऽकृतेः क्वाऽयात् ? क्व गता भव्यता तनोः
माता सा, स कुमारश्च क्व गतौ ? धिक् किमीक्ष्यते !

४७

देशस्थितिस्तु शोच्याऽस्ति, विश्वामित्रस्य शासनम्
संप्रदायाऽधारगतम् समा भेदयते प्रजाः

४८

गतं स्थानं योग्यतायाः, गता बन्धुत्वधारणा
सर्वत्रैव ब्राह्मणत्वम् एव मूर्धन्यवस्थितम्

४९

अध्यक्षत्वेन सर्वत्र ब्राह्मणा एव पूजिताः
'परस्परं प्रशंसन्ति ह्यहो ! रूपमहो ! ध्वनिः'

५०

न सन्ति नियता न्यायाः, न च न्यायाय संसदः
ब्राह्मणानां गिरो न्यायाः, ब्राह्मणा एव संसदः!

५१

हिमप्रदेशे नीहार इव तत्राऽपि तन्नयः
स्थानीयानां विकासस्य द्वेष्टा, रोद्धा च वर्तते

५२

शैक्षिकम् नैतिकं चाऽपि विकासं तेन विघ्नता
[1]किमद्यकीकृता वृत्त्या स्वल्पया ब्राह्मणेतरे

५३

१. किम् अद्यम् किं भक्षणीयमिति ये चिन्तयन्ति ते किमद्यकाः। किमद्यकानां ये लोका द्विषन्तस्तानवाप्नुयुरिति महाभारतीयोद्योगपर्वादौ प्रयोगदर्शनात्।

निर्वृत्तयोऽशिक्षिताश्च वृत्त्यै तच्चारतां गताः
जना बन्धून् विनाश्याऽपि द्रढयन्त्येव तन्नयम्

५४

शिक्षाया योग्यतायाश्च मूल्यं हर्तुं स कौशिकः
पदे नियुक्तवान् उच्चे प्राकृतानपि सेवकान्

५५

तेन सर्वेष्वविश्वासात् एकताविरहेण च
नोच्छृङ्खलं तस्य नयं रोद्धुं शक्नुवते प्रजाः

५६

पिशुनैः, कण्टकन्यायैश्चाऽपि वन्दीकृता वयम्
नैव किञ्चित् मनोनीतं लेखितुं भाषितुं क्षमाः

५७

असिधारेव तन्नीतिः कथं सह्येत सर्वदा
शरणं त्वां प्रपन्नाः स्मो, जहि जीवय वा नृप !"

५८

एवं तन्द्राभावनया प्रबुद्ध इव भूपतिः
ददर्श चितिकाम् अग्रे ज्वलन्तीं तत्र, नैव तान्

५९

"सर्वं सत्याय यत् प्रेक्षे कुस्वप्नं वा कुलक्षणम्"
इति ध्यात्वा कर्मयोगी स स्वकृत्ये प्रवृत्तवान्

६०

कृष्णा रात्रिः, जगत् मौनम्, अज्यौत्स्ना द्यौः सतारका
सन्ति साक्षीणि नृपतेः तत्र तीव्रं तपस्यतः !

६१

कामाद्याः शत्रवः पिष्टाः, हृदः स्वार्था बहिष्कृताः,
तृणीकृता जगद्भूतिः अद्य तेन महात्मना !

६२

भिनत्तीव जगन्निद्रां, छिनत्तीव निशातमः
[1]उनत्तीव शिलां दूरेऽकस्मात् क्रुष्टं श्रुतं तदा

६३

धीरं किञ्चित् स्फुटं जातम् क्रन्दितं तत्, क्षणेन च
आक्रोशन्ती काऽपि योषित् इत ऐतीति लक्षितम्

६४

क्षणेन च मृतं बालं वहन्ती, तं विलोक्य च
मुहुर्वक्षस्ताडयन्ती, शुचा विप्लुतचेतना, –

६५

रात्रीव मलिना, जीर्यद्वस्त्रा, व्याकीर्णमूर्धजा,
श्मशानशुनकैः रोषात् प्रधाव्य क्षतविक्षता,–

६६

व्यथाम् उपेक्ष्य तां सर्वाम्, प्राणाधार ! ममात्मज !
मां त्यक्त्वा क्व प्रयासीति विलपन्ती, कृशीयसी,

६७

मूर्तेव वेदना, साक्षात् विपत्तिरिव रूपिणी,
एकाकिनी प्राप तत्र काचित् स्त्री विजने, निशि

६८

एकां दीनां च तां वीक्ष्यः सदयः स नृपोऽवदत्–-
"मातर् ! मा शोच, जगतो गतिरेषा, हृदा स्मर

६९

---

१ उनत्तीव क्लेदयतीवेत्यर्थः ।

के जङ्गमाः स्थावरा वा सर्वं एव हि नश्वराः
एवंप्रकृतिकं विश्वं ज्ञात्वा मातः! शुचं त्यज

७०

लता 'नित्यं मद्विटपाऽश्रये स्निग्धः खगो वसेत्'
इतीच्छेत्, स परं मुक्तोऽनन्ते कुत्र वने वसेत् !

७१

विसृज्य स्वाश्रयं, याते तस्मिन् पक्षिणि सा लता
यथा न दूयते, त्वं च मा दूयस्व तथा सुते

७२

प्राप्तसिन्धोर्जलस्येव शिशोः प्राप्तपरात्मनः
न स्वस्य प्रभवे स्नेहः, किं त्वमेवाऽत्र दूयसे ?"

७३

इति भूपे सान्त्वयति प्राह सा सास्रया गिरा–
"भ्रातश्चण्डाल ! शक्नोमि नैव धारयितुं मनः

७४

त्वयाऽद्य ज्ञानवचसा शतधा बोधिताऽप्यहम्
कथं धरानि चित्तं भो ! ममाधारः सुतो गतः !

७५

स्वाराज्यसदृशं राज्यं गतम्, इन्द्रपराक्रमः
पतिर्गतः, केवलोऽसौ पुत्रोऽपि फणिना हतः !

७६

मां विहाय क्व प्रयासि ? प्राणाधार ! ममात्मज !
उदञ्चय दृशौ वत्स ! मातरं स्वां समाह्वय

७७

क्षणं रहस्त्वदालापात् तत् दास्यम्, सा तिरस्कृतिः
असह्योतां मया वत्स ! ते सोढव्ये इतः कथम् ?

७८

'सञ्चित्य दारुघासादि प्रत्येयात् एवमाशया
प्रतीक्षमाणां किं मां त्वम् एवं शोके 'न्यपीपतः ?[1]

७९

यावज्जीवं भारमूढ्वा, सोढ्वा गालीं परस्य च
अनैषीर्दिवसान्, कस्मात् दोषात् त्वां दष्टवान् फणी ?

८०

आसीत् पितुर्दिदृक्षा ते, वदसि स्म सहस्रशः
वत्स ! तातम् अदृष्ट्वैव विरता लालसा तव !

८१

हे स्वामिन्, हे सत्यमूर्ते ! क्वाऽसि हे हृदयेश्वर !
स्वस्य प्राणायितं पुत्रं सकृत् आगच्छ चुम्बितुम्"

८२

श्रुत्वा तस्या गिरं राजा प्रत्यभिज्ञानरोचिषा
दीनां पर्यचिनोत् देवीं, मृतं बालं च रोहितम्

८३

धृतकन्थं मृतं पुत्रम्, दीनां भार्यां च विह्वलाम्
अग्रतो वीक्ष्य नृपतिर्हन्त ! वक्षः कथं धरेत् !

८४

तदा वपुषि रोमाञ्चं, दृशोरश्रु, शुचं हृदि,
श्वासं च वक्षस्यधिकं न्ययच्छत् स वशेन्द्रियः

८५

---

१. न्यपीपतः न्यपातयः इत्यर्थः ।

क्षणं स्वं पर्यवस्थाप्य, सत्यं ध्यात्वा स्खलत्स्वरः
रुद्धकण्ठो नृपः प्रोचे– "देवि ! तां तां शुचं त्यज

८६

त्वामप्यहं पर्यचैषम्, एष पुत्रोऽस्ति रोहितः,
यं [1]संबोधयसे देवि ! सोऽहमस्मि तवाऽग्रतः!

८७

सर्वनाशेऽपि येनैव तोषोऽभूत्, सोऽप्ययं गतः
न जाने कियदुद्वेलं प्रकुप्यत्यावयोर्विधिः !

८८

प्रत्येति न गतः पुत्रो रुदितैः क्रन्दितैरपि
नमस्तस्मै भगवते कालाय समवर्तिने !

८९

दाम्पत्यम् आवयोर्दैवात् ईदृगेव तपोमयम्
जातं, सोढ्वैव तत् सर्वम्, सत्यं पालय सुव्रते !

९०

प्रमादात् व्यसनात् वाऽपि नाऽहमक्लेशयं युवाम्
राज्यं यातम्, सुतो यातो भजतः सत्यमेव मे

९१

एवं दुःखेऽपि दुःस्थितया, सत्यं स्वं माऽऽक्षिप प्रिये !
'कर्मण्येवाऽधिकारस्ते मा फलेषु कदाचन"

९२

वचोभङ्गया, सत्यभक्त्या, स्वराच्च महिषी नृपम्
परिचित्य बहिष्प्राणान् इव तं परिषस्वजे

९३

१. युधसाहचर्येण दैवादिकस्य ग्रहणात् भौवादिकस्य बुधेर्बुधयुधेति नाऽऽत्मनेपद–निषेधः ।

विश्वस्नेहस्याऽकरं तं स्थितप्रज्ञं नराधिपम्
आश्लिष्य महिषी तस्मात् स्वभागं स्नेहमाददे

९४

देवी स्वीयां दुःखगाथां रुदती तम् अवर्णयत्
राजा महात्मगाथाभिः दूनां तां समबोधयत्

९५

वराकी सा जीवने यत् यत् स्वं स्मरति, तत् समम्
जग्धं भाग्येन, भग्नाशा कथं बोधेत् निराश्रया ?

९६

जीवने बलवान् बन्ध आत्मघाते व्यतिक्रमः
अनाथा सर्वशून्या सा कथं बोधेत् निराश्रया ?

९७

तथाऽप्येतां शोकगाथां धीरं संक्षेपयन् प्रियाम्
अन्ते श्मशानस्य शुल्कम् अयाचत महीपतिः

९८

स्वामिनी प्रकृतिक्रूरा कार्यलोपात् अमर्षिणी
नाऽददात् निशि साहाय्यम्, न किञ्चत् शववेष्टनम्

९९

स्वयं जीर्णैकवसना ! शुल्कं कं हन्त साऽर्पयेत् ?
तेनाऽन्यतन्त्रो नृपती रुरोध शवसंस्कृतिम्

१००

"राजसौधे जनित्वाऽपि, तथेदृश्यां विपद्यपि
'नाऽपो[1] वासःखण्डमपि वत्स! भाग्यं कियत्तव?"

१०१

---

१ नाऽपः न प्राप्तवान् त्वमित्यर्थः ।

विलपन्तीं भूय एवं राज्ञीं प्रोचे स भूपतिः---
'विज्ञाऽपि बोधिताऽपि त्वं किं मूढेव विद्रूयसे ?'

१०२

राजसौधाः, राजवंशाः के वा सन्त्यजरामराः ?
विप्लवः, प्रलयो, भङ्गः एष एव हि संसृतिः !

१०३

संसृतिं वीक्ष्य मा शोच बोध, मा निन्द पूजय
सत्यस्य केलिरेवेयम् क्षणद्वन्द्वमयी प्रिये !

१०४

देहस्य भङ्गिनः किं स्यात् वस्त्रमप्यस्य दुर्लभम्
किं दुरापं देहिनस्तु यस्य क्रीडास्थलं जगत् !

१०५

तत् देहोऽयं गतासुत्वात् बीभत्स्यः, काऽस्य काम्यता !
स आत्मा चाऽनश्वरत्वात् प्रभुः, का तस्य शोच्यता !

१०६

तत् तां शुचं विहायाऽथ विधातुं शवसंस्कृतिम्
स्ववस्त्रार्धं विदार्याऽपि मर्मज्ञे ! शुल्कमर्पय

१०७

वेत्स्येवाऽहं पराधीनः शुल्कायैव नियोजितः,
भार्याम् अकिञ्चनां च त्वां जानन्नपि तदर्थये

१०८

ब्रवाणि कति वा भद्रे ! लपित्वैव निशा गता !
अथ मैवं विलम्बस्वे, किं वदेयुर्गृहे तव ?

१०९

'ईशावास्यमिदं सर्वम्' कस्य राज्यं कुतो गतम् ?
का स्वता मयि पुत्रे वा ? वसुधैव कुटुम्बकम् !

११०

तत् राज्ये मयि पुत्रे च सीमितां तां धियं त्यज,
ममत्वं अममत्वेन जय त्वम्, अशुचा शुचम्

१११

भूय एवं सङ्गमः स्यात् न वा, 'मे'[1] ऽन्त्यं वचः शृणु--
"कायेन, मनसा, वाचा सत्यमेव भज प्रिये !"

११२

महात्मनो भर्तुराज्ञां जिघृक्षन्ती निजात्मना,
पुत्रं बलात् विस्मरन्ती, स्मरन्ती च पुनः पुनः

११३

उज्जीवनाशया चैनं पश्यन्ती मुहुरेव सा
छेत्तुम् स्ववस्त्रम् आरेभे महिषी शुल्कमर्थिता

११४

इतः शुल्कं प्रदित्सन्ती देवी, शव इतः सुतः,
वीतैषण उदासीनो नृपश्चेतो विलोक्यते

११५

तदैव स्निग्धगम्भीराऽश्रूयत व्योमभारती–
"आदर्शनारि हे देवि ! मा मा शाटीं विदारय !"

११६

क्षणेन च श्मशानस्य शुक्लयत् गाढयामिनीम्
किञ्चित् दिव्यं संमिलितं तेजः प्रादुरभूत् पुरः

११७

---

१. 'मे' इत्यस्यापि स्वतन्त्राव्ययशब्दत्वात् वाक्यादौ प्रयोगे न दोषः ।

कुतः किमिति सन्दिह्य ताभ्यां सोत्कण्ठमीक्षितम्
तेजःपुञ्जं तत् विभक्तम् स्पष्टं देहाकृतित्रये

११८

तेषाम् आसीत् एकतम ऋषिराजः स कौशिकः
इन्द्रः स्वराट् एकतरः, एकश्च भगवान् यमः

११९

तान् विलोक्यैव संभ्रान्तौ, विस्मितौ, नतमस्तकौ
तौ दम्पती यथाशास्त्रम् तान् विवक्षून् प्रणेमतुः

१२०

ततः सर्वाङ्गसत्यैस्तैः चरित्रकिरणैः शुभैः
मर्त्येतिहासभानुं तं प्राहुः स्मैकस्वराः सुराः--

१२१

"राजन्! धन्यमहो धन्यम् धन्यं! सत्यव्रतं तव
धन्यम् आत्मबलं, धन्यं तपो, धन्या सहिष्णुता!

१२२

भूर्भुवःस्वः समे लोका आश्चर्ये विनिपातिताः
असिधाराव्रतं साङ्गम् अखण्डं चरता त्वया

१२३

समाप्ताऽग्निपरीक्षा ते, समाप्ता दुःखवासराः,
श्रान्ताऽस्माकं परीक्षैव, धन्यः सत्याग्रहस्तव!

१२४

प्राणिमात्रे स्वात्मभावः, तत् क्षात्रं, सा च सत्यता!
महात्मन्! नैव पश्यामो देवेषु, त्वयि चान्तरम्

१२५

धन्यवादोऽस्ति ते, मर्त्या यदि सर्वे भवादृशाः
भूलोकः सर्वलोकानां मूर्ध्नि वर्तेत गर्वितः !

१२६

सत्यवीर ! सपत्नीकः पृथ्वीं प्राक् इव पालय
अद्यैव वा स्वर्गमित्वा देवबन्धून् सनाथय

१२७

आदर्शसाध्वि हे देवि ! त्वां प्रशस्य न शक्नुमः
सत्ये, पत्यौ च ते भक्तिम् अध्येष्यन्ते सुराङ्गनाः

१२८

तव प्रेयान् एष पुत्रो मूर्च्छां तीर्त्वाऽयमुत्थितः,
आलिङ्गैनं वीरपत्नि ! भाविनं चक्रवर्तिनम्

१२९

स्वर्गराज्यात् अमूल्यस्य सत्यस्य धनिनौ युवाम्
किं देयम्, कल्पकल्पान्तं यशो वां पारितोषिकम्

१३०

न स्मर्तव्यः स श्वपचः, न द्विजो, न च दासता
कल्पिता एव ते, स्वप्नान् इव विस्मरतम् समान्

१३१

राजा [1]सलज्जनम्रस्य मुनेर्वाचं तथाऽन्ययोः
प्रतिपद्य, क्षणं तैश्च संलप्योचे निजं सुतम्--

१३२

"कामं परीक्षका राज्यं याचेरन् अनृतत्वतः
परं मयैव प्रत्तं तु नैव जात्वनृतं भवेत्

१३३

---

१. सलज्जं नम्रस्तस्य ।

यातु संपत्, यातु राज्यं, यान्तु प्राणाश्च किन्त्विदम्
सत्यं नो मां त्यजेत्—एवं मेऽस्ति वाञ्छा चिरन्तनी

१३४

तस्मात् वत्स ! विबोध त्वम्— ईदृगेव हि संसृतिः
क्वचित् घर्मः, क्वचित् छाया, क्वचित् रात्रिः, क्वचित् दिनम्

१३५

वंशवृत्त्या, प्रकृत्या वा निर्बध्नीत प्रजा यदि
कर्तव्यधीरनासक्तः प्राप्तं राज्यासनं श्रयेः

१३६

संरक्ष्य सत्यमादर्शम् उन्नमय्याऽत्मगौरवम्
भ्रातृसाधारणो भूत्वा प्रजां पालय वत्सक !

१३७

एषा तपस्विनी माताऽन्या च माता धरा त्वया
सेव्येयाताम् एकदृशा, ह्युभये तव पोषिके !

१३८

किं ब्रवाण्यधिकं वत्स ! सदैतत् हृदये स्मर—
"तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्वित् धनम्"

१३९

इति त्रयोदशः सर्गः

वाल्मीकि विद्यापीठ पुस्तकालयः

प्रत्यावर्तनतिथिः

Acc. No ....

Class No .... Book No ....

Author .... [illegible] प्रसाद ....

Title .... सत्य हरिश्चन्द्रम् ....

Due on	Borrower's Name	Returned on

MAHENDRA SANSKRIT UNIVERSITY 1986 AD

महेन्द्र संस्कृत विश्वविद्यालय

वाल्मीकि विद्यापीठ

पुस्तकालय

लेखकस्याऽन्याः कृतयः

(१) विश्वदेवाः (लघिष्ठकथाकाव्यसङ्ग्रहः –संस्कृते)

(२) तदर्थमेव (कवितल्लजस्य श्री म. वी. वि. शाहस्य 'उसैको लागि' इति कवितासङ्ग्रहस्य अनुवादः – संस्कृते)

(३) ईशावास्यवृत्तिः (विनोवामहोदयस्येशावास्यवृत्तेरनुवादः – संस्कृते)

(४) अगुल्टो (कवितासङ्ग्रहः – नेपाल्याम्)

(५) झिल्का (भावनात्मककथासङ्ग्रहः – नेपाल्याम्)

(६) म लोग्ने हुँ (लघिष्ठकथासङ्ग्रहः – नेपाल्याम्)

(७) एक्काईस कथा (कथासङ्ग्रहः – नेपाल्याम्)

श्री ५ को सरकारको छापाखानामा मुद्रित ।